 Chapter 3

# अथ तृतीयोऽध्यायः
## (सुधाविन्धोः सिंहावलोकनम्)

## हरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

श्रीहरिवाक्यसुधासिन्धोः द्विशताधिकद्विषष्टितरंगास्सन्ति इति तु पूर्वमेव प्रतिपादितम्, तेषु तेषु तरंगेषु यदुपदेशः संगृहितः तदत्र संक्षेपेण लिख्यते-

- तत्र प्रथमे- अखण्डवृत्युपनिषन्नामके

आद्ये तरंगे कठिनसाधनोत्तरमीरितम्।
तथा मायादिप्रश्नानामुत्तराणि यथार्थतः।।

भगवत्प्रसन्नतायाः कठिनसाधनस्य, मायास्वरूपस्य, मुक्तिस्थतन्वाः, सत्सगगाढप्रीतिरोधकस्य च प्रश्नजिज्ञासाना क्रमेण मूर्त्यखण्डवृत्तिरक्षणस्य, मूर्तिध्यानावरणकारस्य, ब्राह्मीचेतनतन्वाः, साध्ववगुणग्रहस्य च प्रत्युत्तररूपेण वर्णनम् कृतम्।

- द्वितीये- वैराग्यभेदोपिनिषन्नामके

वैरागयस्य तु भेदानां, श्रेष्ठादीनां यथार्थतः।
हरिणोक्तानि लक्ष्माणि द्वितीये स्वप्रियं द्विजम्।

मयरामप्रश्नमाकर्ण्य विरक्तेर्कनीयमध्यमोत्तमभेदान् कथयामास प्रभुः।

- तृतीये- तल्लीलास्मरणोपनिषन्नामके

हरेः स्थानं च तल्लीलास्तदाश्रितजनास्तथा।
तद्भक्तैः स्मरणीया वै सदेत्युक्तं तृतीयके।।

बाह्यान्तरमूर्तिदर्शनेऽपि भक्तैः भगवत्तदावताराणां च विविधालीलाः सदैव स्मर्तव्या प्रयाणे तत्स्मृतेः श्रेष्ठफलदत्वादिति प्रतिपादितम्।

- चतुर्थे-

ईर्ष्या कार्या न कर्तव्या तयोर्भेदश्चतुर्थके।
द्रष्टान्तकथनेनोक्तो नारदस्य च तुम्बरो:।।

परकीयसद्गुणाद्यतिशयाऽनुभवितुस्तद्गुणग्राहिण्या स्पर्धाया औचित्यं, न त्वीर्ष्याया:, दुर्गुणत्वात्, भक्तद्रोहकारिणीत्वाच्च, अत्रार्थे नारदसंगीताध्ययननिदर्शनमुखेन तुम्बरूसमसंगीतकृतप्रभुप्रसन्नतात्मकफलप्राप्ति बोधकोपदेश: कृत:।

- पञ्चमे- भगवद्ध्यानोपनिषन्नामके

पञ्चमे श्रीहरेर्ध्यानं, कर्तव्यं सर्वदा हृदि।
भक्तैस्तस्य दयाहेतुर्हठादुत्कैरितीरितम्।।

भगवदेकतानस्मरणाऽभ्यासोऽत्र दिव्यमानववेषेऽपि कृपाप्रद इति प्रतिपादितम्।

- षष्टे- विवेक्यभ्युदयोपनिषन्नामके

षष्ठे तु लक्षणं प्रोक्तं पुरूषस्य विवेकिन:।
पृथक्फलेन सहितं पुंसश्चाप्यविवेकिन.।।

गुणग्राहिविवेकताविविधतातद्भिन्नाऽविवेकिता त्यागश्चोपपादित.।

- सप्तमे- पञ्चान्वयव्यतिरेकितोपनिषन्नामके

जीवेशब्रह्मकृष्णानामन्वयव्यतिरेकत:।
सप्तमे पृथगुक्तानि सुस्पष्टं लक्षणानि तु।।

जीवेश्वरमायाब्रह्मपरब्रह्मणामन्वयव्यतिरेकता च स्फुटरूपेण प्रतिपादिता।

- अष्टमे- सेवावृत्युपनिषन्नामके

अष्टमे कृष्ण तद्भक्तसेवायामक्षवृत्तय:।
योज्या न मायिकार्थेषु सर्वथेति समीरितम्।।

इन्द्रियांत:करणशुद्ध्यर्थकसत्संगसेवादिलाभकरणतद्भ्रष्टताविधायककुसंगादित्यागकरणाऽहम्ममतानिवृत्यादिकं निरूपितम्।

- नवमे- प्रत्यक्षपूर्णकामतोपनिषन् नामके

प्रत्यक्षश्रीहरौ निष्ठा कार्या ब्रह्मपुरेश्वरे।
सर्वथाऽतोऽधिकं किञ्चिन्नेत्युक्तं नवमे स्फुटम्।।

प्रत्यक्षभगवन्मूर्ति-दर्शनादिलभ्यपूर्णकामत्वतदभाववद्वार्तासमागमाद्यकरणपूर्णकामभक्तसमागमादिकरणघामैश्वर्यादिदिव्यदर्शदानप्रत्यक्षनिष्ठाश्चोपपादिताः ।

- दशमे- कृतघ्नसंगत्यागोपनिषन्नामके ।

वार्ताकृता कृतघ्नस्य हरिणा दशमे ततः ।
संगतस्य सह स्वेन सेतुबन्धस्य वर्त्मनि ।।

कृतघ्नस्वरूपपरिचय., सदृष्टान्तं तन्निरूपणं, तत्संगत्यागविधिः, साधुत्वं, कलंकपदसंगाऽकरणतादि च वर्णितम् ।

- एकादशे- निर्वासनिकैकान्तिकोपनिषन्नामके

पञ्चानां मायिकाथानां वासनायाः क्षये सति ।
एकान्तिकत्वं सम्प्राप्यमित्येकादश इरितम ।।

वासना तत्क्षयस्तत ऐकान्तिकता भगवन्मात्रसंस्कारभावनाभिरन्यसंस्कारवासनादिविलयश्च समीरितः ।

- द्वादशे- तत्वलक्षणबोधोपनिषन्नामके ।

द्वादशे तु पदार्थानां लक्षणान्युदितान्यथ ।
संसर्गादिकं च तत्वानां हरेर्धाम्नश्च लक्षणम् ।।

माया, मायिकतत्वानां स्वरूपादियथार्थज्ञानेन तदज्ञाननिवृतया देहेन्द्रियभ्रमकर्मपुण्यवासनादिबन्धननिवृत्तिः, भगवदीक्षणं, ब्रह्मप्रेरणं, पुरूषसञ्चालनम्, मायाविकसनं प्रधानादिजननं, मत्वपार्थक्यं, सृष्टिप्रवाहः, कारणकार्यतादात्म्यं सृष्टित्रैगुण्यं बह्मधामघनप्रकाशत्वं च वर्णितम् ।

- त्रयोदशे- प्रतिवर्ष्मजीवात्मैक्योपनिषन्नामके

त्रयोदशे तु जीवैक्यं प्रतिदेहं स्वकर्मतः ।
स्वजन्म फलदातृत्वं हरेश्चेति समीरितम् ।।

प्रतिशरीरजीवैक्योनैक्यसन्हेहनिवर्तकैकस्यसिद्धसमाधान प्रतिपादनम् ।

- चतुर्दशे-त्यागिगृहिलक्षणमतिगत्युपनिषन्नामके

---

चतुर्दशे त्यागिगृहिपृथक्लक्षण ईरिते।
अन्ते मतिर्गतिश्चेति श्रुत्यर्थः सम्यगीरितः।।

त्यागिगृहिवैराग्यवासनौदासीन्यादिसमविषमश्रैष्ठ्यपरीक्षणषट्पक्षीयोपन्यासः, वासनावैविध्यं कनिष्ठतापादकम्, मानसत्यागस्य सत्यमूलत्वं चाभिहितम्।

- पञ्चदशे- आज्ञापालनमूर्तिधारणोपनिषन्नामके

पञ्चदशे हरेर्माहात्म्यविद्युग्भक्ति लक्षणम्।
भक्तस्य मूर्तिधर्तृत्वे प्रोत्साहः सिद्धिरीरिता।।

सदृष्टान्तभक्तिः परानुरक्तिः परानन्दाऽशनं फलं, साधनानां भक्तौ चिच्छ्रान्तिःपरतरो भक्तियोगः, रसोद्वेलतायाः चिह्नानि, तथाविधाः सेवकाः प्रेमानुमापकवर्तनं सधैर्यसश्रद्धशूरत्वं सुरूपध्यानसातत्यं, परमपदप्राप्तिरित्यादि निरूपितम्।

- षोडशे- सदसद्विवेकोपनिषन्नामके

षोडशे हरिभक्तस्य सदसत्प्रविवेकिणः।
लक्ष्मपरिचयः प्रोक्तः धर्मविमर्शशीलिनः।।

सदसदर्थविवेकविमर्शः, सत्समुच्चयख्यातिस्वरूपम्, अविवेकादिदोषभासनं सद्देशादिविवेचनं विपरीतानां विवेचनम्, आत्मसत्ता विमर्शः प्ररूपितम्।

- सप्तदशे- कुसगत्यागोपनिषन्नामके

सत्संगिषु कुसंगोल्पोऽनुत्साहवार्तिकात्मकः।
तस्य सप्तदशे त्यागः कथितस्तन्निरूपणात्।।

सत्संगे मिश्रितस्य स्वल्पस्य धर्मादिपालनाऽनुत्साहात्मकस्य भगवन्मूर्तिधारणाऽशक्तिस्वरूपस्य च कुसंगस्य निरासः परित्यागश्च प्रतिपादित।

- अष्टादशे- आन्तःशुद्ध्यादिहेतूपनिषन्नामके

अन्तःशुद्ध्यशुद्धिहेतु सदसद्विषयांकनम्।
प्रोक्तमष्टादशे हर्यननुकरणमित्यपि।।

आत्मपरमात्मज्ञानपूर्वकप्रकटबलानुजायमानप्रमादवत्पुरूषादिसतुष्टिकविघ्नवत्ता., सदृष्टान्त सदसद्वाह्यपंचविषय सेवनजन्यशुद्ध्यशुद्धिः, सदसद्देशकालादिसेवनजन्यान्तरनैर्मल्यकालुष्य-कुपात्रजननिष्कामन -

स्वाशीर्वादाऽप्रसन्नतादि प्रदर्शननिजाऽऽचरणाऽनुकरणाऽकर्तव्य-विधिपालनपूर्वकधामप्राप्त्यादिकं प्रतिपादितम्।

- एकोनविंशे - चतु:साधनसार्थक्योपनिषन्नामके

स्वधर्मात्मनैष्ठ्यभक्तिविरागाणामपेक्षणम्।
मिथ एकोनविंशे सार्थक्यं स्फुटमीरितम्।।

धर्मज्ञानवैराग्यभक्त्यात्मक साधनचतुष्ट्याऽन्यतमसार्थक्यसत्संगद्वारक तद्दृढीकारितादिकं निरूपितम्।

- विंशे- आत्मेक्षणोपनिषन्नामके

विंशे स्वात्मेक्षणाऽयत्नी, प्रमाद्यलस ईरित:।
आत्मेक्षणोद्यम: कार्य इत्याह भगवान् स्वयम्।।

आत्मेक्षणोद्यमवतां स्वात्मेक्षणं सत्संगप्रतापाद्सुलभमेवेति प्रतिपादितम्।

- एकविंशे - चतु: साधनभक्तमूक्त्युपनिषन्नामके

धर्मज्ञानविरागांऽगिभक्तिर्यस्य हरौ भवेत्।
तस्य प्रीतो हरिरेकविंशे तद्धि समीरितम्।।

धर्मज्ञानवैराग्ययुग्मभक्तिरूपसाधनचतुष्ट्यैकान्तिकत्ववासनाक्षयदेहदैहिकाऽस्मरणाऽक्षरस्वरूपद्वयाऽविक्षिप्तहृद्गतभगवन्मूर्ति चिन्तनादिसमुपदेश:

- द्वाविंशे - श्रीहरिस्मृतिगायनोपनिषन्नामके

हरिस्मृतियुतं गानं तदन्यद् गायनं त्वसत्।
स्यान्मूर्तौ मानसस्थैर्यं द्वाविंशे हरिणोदितम्।।

भगवत्स्मृतियुक्तगायनस्यैव गायनत्वं, सर्वासु क्रियासु सर्वदा भगवत्स्मरणस्यकर्तव्यतादिकं प्रतिपादितम्।

- त्रयोविंशे - भक्तिस्थितिरीत्युपनिषन्नामके

देहात्मबुद्धि: सन्त्याज्या, भक्ति: कार्याऽऽत्मनिष्ठया।
मूर्तौ धार्यं मनश्चेति त्रयोविंशे समीरितम्।।

।।जय स्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभावः

---

अष्टसच्छास्त्रान्तःस्थवासुदेवमाहात्म्यस्य ' श्रेष्ठतमरूचिगोचरता भगवद्यथार्थनिश्चयज्ञानाकाराः सविचारनिर्विचारादिभक्तिवृत्तिवैशद्यं देहाद्यात्मबुद्धेःचैतन्येऽनैकान्तत्तानिरासः सकामभक्तैकान्तिकभक्तलक्षणानि स्थितिभेदाश्च वर्णिताः ।

- चतुर्विंशे - ज्ञानप्रलयोपनिषन्नामके

माहात्म्यज्ञानजा स्वेष्टे, स्थितिः प्रोक्ताऽथ कारणम्।
अपूर्णतायाः सम्प्रोक्तं चतुर्विंशे तरंगके।।

ज्ञानप्रलयस्वात्मब्रह्मप्रकाशपरब्रह्मदर्शनमलिनसंकल्पनिवृत्तिभगवत्तत्साधुदोषादर्शित्व बालकरगचिन्तामणिवद्भगवन्निश्चयोत्तरधन्यकृतार्थताविवेकाऽभाव प्रयोज्याऽपूर्णकामना तन्निवारणार्थ सत्संगभक्तिकरणगुण ग्रहणादयो निरूपिता ।

- पञ्चविंशे- निरोधसमाधिपूर्णकामतोपनिषन्नामके

प्रोक्तश्चापूर्णताहेतुर्भक्तानां पञ्चविंशके।
साधनद्वयतस्तस्याः प्रोक्तं निवर्तनं तथा।।

पूर्णकामताप्रयोजकाऽऽत्मनिष्ठाभगवन्माहात्म्यज्ञानवर्णनसमाधिभयोत्सारणप्राणचित्तान्यतरनिरोध-वासनानाश-वार्योघप्रवाहदृष्टांत भगवन्मूर्तिसमाधिमहानन्दाशन फलातिकृतार्थपूर्णतादिकाःप्रपादिताः ।

- षड्विंशे- भगवद्रसिकत्वोपनिषन्नामके

षड्विंशे हरिशब्दादौ प्रोक्ता रसिकता ध्रुवा।
भक्तानां नान्यविषया दिव्येयं मोक्षदा मता।।

भगवत्स्मृतिपूर्वकगायनकर्तृकसत्यरसिकत्वमायिकमात्रस्मरणसहगायनकर्तृकाऽसद्रसिकत्व-जाग्रतस्वप्नादिगतमूर्तिस्फुरण- निजात्मगताऽक्षरब्रह्मप्रकाशस्थपरब्रह्मदर्शनात्मकफलादिकाः प्ररूपिता. ।

- सप्तविंशे- समर्थजरणोपनिषन्नामके

सर्वकर्तृहरिज्ञातृहृतस्थहरिगुणोदयः ।
दीनदुःखकरी माया जीवा गृही सुयोषिति।।
मुग्धस्तुच्छमतिस्त्यागी समदृष्टिर्महान्मतः ।
स क्षमश्चेति सामर्थ्यं सप्तविंशे समीरितम्।।

---

भगवन्निवसितसमर्थसाधुमहाप्रतापभगवन्निवासकारक शुद्धमाहात्म्यज्ञान-मायिकजीववर्तन- विषयमुग्धजनतुच्छबुद्धिमत्त्व-महत्त्वसद्गुणवत्व सत्पात्रतादिका: स्फुटरूपेण निरूपिता:।

- अष्टाविंशे - पतनाऽपतनोपनिषन्नामके

अष्टाविंशे वासनोक्ताऽशुभाशुभा हि कारणम्।
पतने चोन्नतावाद्या त्याज्या ग्राह्येतरोदिता।।

अवगुणग्राहिपतनफलगुणग्राह्यभ्युदयफल-सत्संगकरणादिका: निरूपिता:।।

- एकोनत्रिंशे- भक्तिवृद्धिचित्तनैर्मल्योपनिषन्नामके

सद्देशादिचतुर्निष्ठा, सांगभक्तिप्रवर्धना।।
असद्देशादिचत्वारो भक्तेर्विधातका: मता:।।
कृपाप्रारब्धयत्नाश्च चित्तनैर्मल्यकारिण:।
नवविंशे चेरितानि लक्ष्माण्येषां च सद्गम:।।

सदसद्देशकालादिजन्यभक्तिवृद्धिहानिप्रारब्धकृपापुरूषप्रयत्नजन्यान्तरनैर्मल्यादिका: निरूपिता:।

- त्रिंशे- निर्व्याजसत्संगकरणोपनिषन्नामके

त्रिंशे राजसवेगेन संकल्पदंशवासना:।
भगवल्लीनसत्सेवा प्रोक्ता तन्निशिका त्विह।।

वासनासंस्कारोद्भवानुद्भवकारणबोधकवासनाऽनाधायकसंकल्पविकल्पाऽनुत्थानहेतुसत संगादिकानां निरूपणम्।

- एकत्रिंशे- द्विविधहरिभक्तोपनिषन्नामके

एकत्रिंशे द्विधा भक्ता, निवृत्तोऽन्यस्तु सेवक:।
दोषदर्शी त्वासुरोऽथ, भक्तलक्ष्माऽपि चेरितम्।।

निवृत्तभक्तापेक्षयाप्रवृत्तभक्तस्य सेवकस्य श्रैष्ठ्यं, भगवत्तत्साधुजनानां स्वल्पेऽपि दोषे गुणग्राहित्वं, भगवन्निश्चयपूर्वकाऽऽज्ञापालकत्वं महत्ताप्रदमितिनिरूपितम्।

- द्वात्रिंशे- भगवत्स्थानकीलकोपनिषन्नामके

---

भक्ताऽभक्तेन्द्रियार्थानां भेदो, ध्यानस्य सिद्धिकृत्।
साधनं, भजनं त्वन्यद् द्वात्रिंशे हि समीरितम्।।

भगवत्सम्बन्धिविषयिभक्तजनमायिकविषयिमात्राऽभक्तजनकथनपूर्वक-संकल्पनिरोधसाधन- सत्वगुणोद्रेककालीनध्यानाचरण तदर्थसत्संगकरणाऽऽदिकानां प्रतिपादनम्।

- त्रयस्त्रिंशे- भगवत्प्रसन्नतासाधनोपनिषन्नामके

हरेर्दृढाश्रय: प्रसन्नहेतुरथेरित:।
ज्ञानिश्रैष्ठ्यं त्रयस्त्रिंशे स्नेह्यार्थप्रीतिमत्स्वपि।।

भगवत्प्रसन्नातायै भगवदाश्रयो मुख्यं साधनं, वैश्वासिकस्वार्थिकस्नैहिकज्ञानिकचतुर्विधाऽऽश्रयेषु ज्ञानिकृताश्रयात्मक साधनस्य दृढस्य प्रसन्नतापादकस्य श्रैष्ठ्यमिति निरूपितम्।

- चतुस्त्रिंशे- स्नेहात्मकभगवन्मायोपनिषन्नामके

हर्यन्यासक्तिकृद् यच्च, भक्तक्लेशकरं तथा।
चतुस्त्रिंशे द्वयं प्रोक्तं, कारणं प्रेम मायिकम्।।
सत्संगेन हरौ प्रीत्या, हर्याज्ञापालकस्य तु।
साक्षाद्हरिसुखावाप्तिर्भवत्यपि समीरितम्।।

स्नेहात्मकभगवन्मायास्वरूपस्य भगवन्मूर्त्यतिरिक्तपदार्थवृत्तिमज्जनानां मायिकाकर्षणस्य त्यागिगृहिजनीयधर्मसदाचरणादिवृत्तिज सुखादिजननस्याऽभक्तानां कर्मानुगामिफलमन्तृत्वमुपपादितम्।

- पञ्चत्रिंशे- नि:श्रेयोऽध्वस्थित्युपनिषन्नामके

पञ्चत्रिंशेऽल्पबुद्ध्यनल्पबुद्ध्यो: श्रेयसोऽध्वनि।
स्थितौ हेतुस्तथा दुर्धीत्यागोपाय: समीरित:।।

बहुबुद्धिमत्स्वभक्तस्य श्रेयोमार्गेऽवस्थितौ हेतो: अल्पधीर्भक्तस्यापि श्रेयोमार्गेऽवस्थितेर्हेतोश्च क्रमशोऽवगुणग्रहणस्य गुणमात्रग्रहणस्य वर्णनम्, अवगुणग्राहकदोषत्यागोपायस्य निदर्शनम्, सत्संगस्य विशेषेण तत्र कारणताया. कथनमित्युपपादितम्।

- षट्त्रिंशे- त्यागिप्रीत्युपनिषन्नामके

षट्त्रिंशे त्यागिभिस्तुच्छे प्रीति. कार्या न मायिके।

---

हरौ प्रीति: सदा कार्येत्युक्तं त्यागित्वपुष्टिकृत्।।

भगवत्तत्सम्बन्धीतरपदार्थप्रीतियथार्थसाधुत्वराहित्यवर्णनपूर्वक समलोष्ठाश्मकाञ्चन. भावभावितभगवत्प्रीतिमत्सत्यत्यागित्वस्य निरूपणम्।

- सप्तत्रिंशे- एकान्तिकभागवतधर्मोपनिषन्नामके

अविवेको विवेकेन नाश्य: सद्भिहरेर्वृष:।
एकान्तिक: समर्ज्यश्च सप्तत्रिंशे समीरित.।।

तीव्रवैराग्यवतआत्मज्ञानिनो विस्मृतदेहगेहसम्बन्धिजनस्य भगवत्साकारोपासकस्य भगवत्प्रसन्नतापात्रस्य साधोरक्षरधाम्नि चिच्चैतन्यात्ममात्रैकरससाकारमूर्तिस्वरूपेण भगवत्स्नेहसेवात्मकमुक्तिप्राप्तिमत्ताया: निरूपणम्।

- अष्टत्रिंशे - मनोनिर्वासनोपनिषन्नामके

मनो निवार्सनं कार्यं हरेर्लीलादिचिन्तनै:।
त्यक्ताऽस्मर्ता गृही त्यागी सत्यो भक्तोऽत्र कीर्तित:।।

मनोनिर्वासनार्थक विमर्शस्य वणिज्दृष्टान्तपूर्वकमृगजन्मभरतदृष्टान्तस्य भगवल्लीलाचिन्तनस्य जनकदृष्टान्तस्य सतां प्रसंगस्य मुक्तिफलस्य च निरूपणम्।

- नवत्रिंशे- निर्विकल्पकसमाधिब्रह्मसत्यत्वोपनिषन्नामके

निर्विकल्पसमाधिस्थदृशाब्रह्माऽखिलोक्तित:।
शुष्कवेदान्तिसिद्धान्तो नवत्रिंशेऽत्र खण्डित:।।

सदेवसौम्येदमग्रआसीदेकमेवाऽद्वितीयंब्रह्मेत्यादिश्रुत्यवलम्बिशुष्कवेदान्तिमताभासनिरसनविशिष्टब्रह्माऽद्वैतसगुणसाकारसिद्धान्त प्रदर्शन- निर्विकल्पकसमाधिदृष्टिकाऽभिप्रायानुसार समन्वयकरणादिकं प्रतिपादितम्।

- चत्वारिंशे- भक्त्युपास्त्युपनिषन्नामके

सविकल्पनिर्विकल्पसमाधिस्योभलक्षणे।
भक्त्युपास्त्यौ पृथक् प्रोक्ते चत्वारिंशतरंगके।।

समाधे: सबीजत्वं निर्बीजत्वं, भक्त्युपासनासूक्ष्मभेदाश्चोपविर्णता:।

- एकचत्वारिंशे- बहुभवनसंकल्पोपनिषन्नामके

---

'श्रुतेरेकोऽहं बहुस्यामित्यस्याहार्दमीरितम्।
ब्रह्मजीवपृथक्त्वं चैकचत्वारिंशके तथा।।'

शुष्कवेदान्तिभिराविद्यकं ब्रह्मैकतत्वमिदं सर्वं, ब्रह्माऽहमिति सत्यस्वरूपप्रत्यक्षलाभमुक्तिमनुसृत्य सर्वस्य ब्रह्मभिन्नतया प्रतीयमानस्य जीवेशतत्वादीना मिथ्यात्वं प्रतिपाद्यते, तत्र आविद्यकं सगुणं ब्रह्म कर्तृमायोपहिता ईशा मलिनाऽज्ञानोपहिता जीवोसंसारश्चेति न परमार्था: सन्त: किन्तु कल्पिता मिथ्येति मतनिरास:।

- द्वाचत्वारिंशके- विधिनिषेधसत्यत्वोपनिषन्नामके

विधिनिषेधमिथ्यात्वं, ब्रह्म सत्यं न चेतरत्।
केवलाऽद्वैतमतिन: प्राहु: सन्न मतं हि तत्।।
निर्विकल्पं स्थितिकानां ब्रह्मद्रष्ट्या वचस्तु तत्।
द्वाचत्वारिंशके प्रोक्तं विशिष्टब्रह्मभावनम्।।

विधिनिषेधादिमिथ्यात्वशुष्कवेदान्तिमत- निरासपूर्वक नैजं सर्वसत्यत्वमतस्थापनमुपपादितम्।

- त्रिचत्वारिंशे- पञ्चमुक्त्यकामनोपनिषन्नामके

पञ्चमुक्त्यनभिलाषा, सेवेच्छैकान्तिकार्थिनाम्।
सर्वकामफला सेति त्रिचत्वारिंश ईरितम्।।

पञ्चविधमुक्त्यकामनापूर्वकैकान्तिकभक्ताऽर्थितकेवलस्नेहसेवामुक्त्युत्तमत्वपरमेशकृतसर्व तत्प्रदायित्वस्य च प्रवर्णनम्।

- चतुश्चत्वारिंशे- स्नेहभक्तिकरणोपनिषन्नामके

कार्य: स्नेहो भगवति देहाऽहम्ममता त्यजि:।
तरंगेऽत्र चतुश्चत्वारिंशे श्रीहरिणोदितम्।।

सम्प्रज्ञानाऽसम्प्रज्ञातसमाधिनवधाभक्तिश्रेष्ठोपासनानिरूपणम्।

- पञ्चचत्वारिंशके- परब्रह्मसाकारतोपनिषन्नामके

साकार: श्रीहरि: प्रोक्तो ब्रह्मतेजो निराकृति।
पञ्चचत्वारिंशकेऽत्र मूर्तवत्कार्यकारि च।।

परब्रह्मसाकारत्वाऽक्षरब्रह्मसाकारत्वनिराकारत्वसाकारसमकर्मफलप्रदानकार्यकर्तृत्वतत्तद्विषयकश्रुतिव्रातसमन्वयैक देशस्थसर्वदेशप्राप्तिविषयव्यापकत्वसर्वसत्साकारतावेदकस्य च निरूपणम्।

- षट्चत्वारिंशके - मायिकाकाशलीनतोपनिषन्नामके

चिदाकाशलयोत्पत्ती न, ते व्याम्नि तु भौतिके।
षट्चत्वारिंशके प्रोक्ते स्फुटे देहनिदर्शनै:।।

चिदाकाशाऽलयमायिकाकाशलयसमाधिस्थितिकसंकोचादि प्रतिपादनम्।

- सप्तचत्वारिंशे- ऐकान्तिकतासाधनोपनिषन्नामके

भक्तैकान्तिकताहेतु चतुष्टयमुदीरितम्।
सप्तचत्वारिंशतरंग के मुख्यैकमित्यपि।।

धर्मनिष्ठाज्ञानात्मनिष्ठावैराग्यनिष्ठाभक्तिनिष्ठानां तद्वतां च लक्षणगुणाऽगुणादिनिरूपणम्।

- अष्टचत्वारिंशे - कुसंग्यसंगोपनिषन्नामके

कुसंगिसंगनाशार्थं पूजायामर्थयेद् हरिम्।
अष्टचत्वारिंशतरंगकेऽन्त: शत्रुतोऽरणम्।।

कौण्डनास्तिकशाक्तशुष्कज्ञानवतां कुसंगत्यागदुर्गुणत्यागार्थं पूजायां भगवत् सन्निधौ प्रार्थयेदिति आदेशितम्।

- एकोनपञ्चाशत्तमे - वृत्तिधारणोपनिषन्नामके

हरावेकोनपञ्चाशत्तमे वृत्तिर्हि मानसीं।
धार्यां वाह्यान्तरी चापि प्रोक्ता हेतुश्च धारणे।।

भगवति यस्य वृत्तिर्निरन्तरा वर्तते, जगत्पदार्थेषु तु निहिताऽपि बहवायासा भवेत्, नैव तिष्ठेत, स भगवद् भक्तो भवति, एतादृक् वृत्ते· साधनमन्तर्दृष्टिरस्तीति प्रतिपादितम्।

- पञ्चाशत्तमे- कुशाग्रबुद्ध्युपनिषन्नामके

पञ्चाशत्तमवीचौ तु कुशाग्रस्थूलधीमताम्।

लक्ष्माण्युक्तानि भगवद्धी: कुशाग्रा नहीतरा।।

भगवद्भक्त्यन्वितबुद्धे: कल्याणकारिण्या: कुशाग्रबुद्धित्वं तदन्याया अकुशाग्रबुद्धित्वमिति च निरूपितम्।

- एकपञ्चाशत्तमे- हीरकभगवद्वेध्योपनिषन्नामके

एकपञ्चाशत्तमे तु मायिकै: करणैर्हरि:।
न ग्राह्यो दिव्यकरणैर्ग्राह्य एवेत्युदीरितम्।।

हीरकवेध्यहीरकदृष्टांतेन भगवतो भगवद् ग्राह्यत्वस्य भगवद्रूपेन्द्रियादिभिर्भगवन्निश्चयस्य भगवद्योगापन्नभक्तेन्द्रियादि दिव्यत्वस्य मायिकग्राह्यभगवन्मायिकत्वशंकासमाधानादे: प्रतिपादनम्।

- द्विपञ्चाशतमे- चतु:शास्त्रपूर्णज्ञानित्योपनिषन्नामके

पूर्णं ज्ञानं चतु:शास्त्रैर्न्यूनैर्न्यूनं हरेरिति।
द्विपञ्चाशत्तमे प्रोक्तं युक्तिस्तद्धारिणीरिता।।

सांख्ययोगवेदान्तपञ्चरात्रचतु:शास्त्रसारसमन्वयजन्यज्ञानिभक्तानां पूर्णज्ञानित्वं तद्राहित्ये न्यूनत्वं चोपपादितम्।

- त्रिपञ्चाशत्तमे- गुणग्रहदोषत्यागोपनिषन्नामके

त्रिपञ्चाशत्तमे भक्तगुणदोषोदयक्षयौ।
प्रोक्तौ सहेतुकौ ग्राह्यो गुणोऽतो दोषवर्जनम्।।

साधुजनादेरवगुणग्राहिण: सत्संगाऽवृद्धिर्गुणग्राहिण: सत्संगवृद्धिरितिनिरूपितम्।

- चतु:पञ्चाशत्तमे- मोक्षद्वारोद्घाटनोपनिषन्नामके

भागवतवृषपुष्टौ मोक्षद्वाराऽत्यपावृतौ।
आपद्धर्मच्युतौ हेतु: पञ्चाशच्चतुरीरित:।।

श्रीभागवतधर्मपुष्टिकारकस्य मोक्षधर्मद्वारोद्घाटनकस्य साधुसमागमात्मकहेतोस्तथाऽऽपत्कालीननिजधर्माऽप्रच्युतिसाधनस्य श्रद्धात्मक हेतोश्च वर्णनम्।

- पञ्चपञ्चाशत्तमे- सदसद्देशाभबुद्ध्युपनिषन्नामके

---

> सदसद्देशकालाद्याः सदसद्बुद्धिहेतवः।
> पञ्चपञ्चाशत्तमोक्तास्त्रेधाधीदार्ढ्यमीरितम्।।

प्राग्भवीयः
बलिष्ठसंस्कारैस्तज्जन्मीयमहासत्पुरूषसेवामहापुण्यजन्यदृढधर्मभक्त्यादीनामसद्देशकालादिभिरप
ाभाव्यताऽन्येषां तु पराभाव्यता शापद्रोहादिजन्याऽऽसुरिबुद्धेः सत्संगेनाऽप्यपरिवर्तनमित्यादिकं निरूपितम्।

- षट्पञ्चाशत्तमे- ज्ञानिनिर्मानिमाहात्म्योपनिषन्नामके

> षट्पञ्चाशत्तमे ज्ञानी श्रेष्ठः प्रोक्तो न मानवान्।
> मे साधर्म्यं। महिमज्ञे सेवोक्ता माननाशिनी।।

आत्मनिष्ठाज्ञानिश्रैष्ठ्यगुणजन्यमानदोषदौष्ट्यमानजयोपायसंस्कारबलिष्ठत्वसमहात्म्योप
ासनाकरणत्वसाधुसमागम
सेवाविधानकूपशिलादृष्टांतसद्भावनासद्गुणवृद्धिपरमैकान्तिकसिद्धदशामोक्षादि प्रतिपादितम्।

- सप्तपञ्चाशत्तमे- स्नेहस्वरूपोनिषन्नामके

> सप्तपञ्चाशत्तमोक्ता दुःस्वभावेऽतिवैरिता।
> स्नेहो द्वेधा मुक्ति हेतुर्हरेर्ज्ञानं सुसंगिता।।

भगवतः स्वरूपज्ञानस्य महिमज्ञानस्य च मोक्षकारणत्वं भगवति द्विविधस्नेहवद्भक्तलक्षणानि, स्वभक्तानां दुःस्वभावत्यागसाधनं च प्ररूपितम्।

- अष्टपञ्चाशत्तमे- सत्पुरूषगुणागमोपनिषन्नामके

> अष्टपञ्चाशत्तमे तु गुणोद्रेके त्रिसाधनम्।
> निवर्तने त्रिकं साधुप्रसादे हेतवस्तथा।।
> दोषनाशे पक्वभक्तौ साधनं च गुणागमे।
> पक्वभक्त भवनस्योपायश्चेति समीरिताः।।

ध्यानसुखविघ्नकारकमायिकत्रिगुणोद्रेके देहात्मभावकुसंगावगुणग्रहणादीनां कारणतायाः, विवेकसत्संगसद्गुणग्रहाणां तन्नाशकतायाः दास्यभक्ततायाः शुभसंस्कारादिजन्यध्यानफलसुखाशनवत्तायाश्च निरूपणम्।

- एकोनषष्टितमे- प्रीतिपुरूषबलोपनिषन्नामके

---

हरौ स्नेहे हेतवस्तु विश्वासाऽऽस्तिक्यनिश्चया.।
सत्संगशास्त्र श्रवणे प्रीतिप्रज्ञापके मते।।
पुरूषो देशकालादौ सत्यसति प्रयोजक:।
इत्युक्तास्त्वेकोनषष्टितमेऽत्र वचनामृते।।

भगवत्यसाधारणप्रीतितत्साधनविश्वासाऽऽस्तिक्यसर्वकर्तृत्वादिमाहात्म्यज्ञाननिश्च यभक्तबलशुभाऽशुभदेशकालक्रियाधारपुरूषबलसत्संगसच्छास्त्रपठनादि कारणकभगवद् विषयकाऽसाधारण प्रेमबोधोद्भवादिकं प्रतिपादितम्।।

- षष्टितमे तरंगे- वासनानिवृत्युपायोपनिषन्नामके

निर्वासनैकान्तिकभक्ततोक्ता, हेतुत्रयं वासनिका विनाशे।
एकान्तधर्मस्थितिरत्र षष्ठितमे तरंगे हरिणेरिता वै।।

वासनानाशोपायानामात्मनिष्ठावैराग्यमाहात्म्यज्ञानानां साधुजनद्वाराप्राप्ताना बलिष्ठतादिवर्णनम्।

- एकषष्ठितमे- उपासनासिद्धिप्राप्त्युपनिषन्नामके

एकषष्ठितमे धैर्याऽलोप: सिद्धिसमागम:।
निर्लेपित्वं प्रेमरज्जुबन्धनं कथितं हरौ।।

कामादिवेगेऽपि धैर्याऽलोपिभक्तस्य लक्षणात्मनिष्ठाभक्तिमत्ताप्रदर्शनमुपासनाया महाबलवत्वं पक्वभगवत्वं सिद्धिसमागमनं प्रेमरज्ज्वा. बलिगृहद्वारीव भगवतो बन्धनमित्यादि वर्णितम्।

- द्वाषष्टितमे- कल्याणगुणनिश्चयोपनिषन्नामके

मन्माहात्म्य सुजातनिश्चययुते कल्याणदा मे गुणा,
निर्बन्ध: स समर्थभक्त इति तद्भिन्नो मतस्त्वासुरि:।
भक्तद्रोहकरोऽथ मानरहित: साधुर्मतश्चेरिता।
सद्द्वाषष्टितमे तरंग इह श्रीमत्सुधासिन्धुजे।।

भगवद्गुणाधायकत्वं आसुरजीवस्य श्रृङ्गिवत्सनागसमदोषाधायकत्वं क्वचित् साधुजनानुवृत्तिसेवाकृतिदैवित्वम्, हीनपीडाकरद्रोग्धृफलप्रदान्तर्यामिशासनाऽहेत्वमित्यादि प्रतिपादितम्।

- त्रिषष्टितमे- दिव्यनराकृतिनिश्चयोपनिषन्नामके

---

पूर्णन्यूनविनिश्चयाऽढ्यजनहृत्संकल्पजालं पृथक्,
कीदृक् तत्कथितं च निश्चयवर: श्रीधर्मजस्येरित:।
धाम्नो रूपमपीह धर्मिवसतिर्लोके नृवेषोहरि:,
ज्ञेयो निश्चयिभक्तलक्ष्म कथनं चात्र त्रिषष्ठे स्फुटम्।।

भगवन् निश्चयाऽनिश्चयवज्जनसंकल्पपरीक्षणं दिव्य तात्विकभगवन्माहात्म्यज्ञानं दिव्यमानवस्वरूपभगवन्निश्चयकथनं भगवदवतरणाक्रमकथनं परिपक्वनिश्चयवद्भक्तलक्षणानि च प्रतिपादितानि।

- चतु:षष्टितमे- शरीरशरीरिभावोपनिषन्नामके

चतु:षष्टितमे प्रोक्तोऽक्षरात्मा दिव्यमानव:।
शरीरी व्यतिरिक्तोऽपि द्रष्टा साकार ईशप:।।

आत्माऽक्षरयोर्भगवच्छरीरत्वस्य शरीरलक्षणस्य दृश्यद्रष्टस्वरूपद्रष्टसर्वात्मश्रीहरेरन्वयिव्यतिरेकित्वस्याऽन्तर्यामित्वस्य साकारश्री हर्युपासनस्य साकारसेवामुक्तिफलस्य निराकारोपासनाजन्यब्रह्मसुषुप्तिलयफलस्यैकान्तिकसाधुद्वारासाकारोपासनालाभस्य भगवत्सर्वगुणलाभस्य च वर्णनम्।

- पञ्चषष्टितमे- व्योमसुषुम्णाशक्त्युपनिषन्नामके

पञ्चषष्टितमवीचिसमुक्ता व्योमभूतिलयरीतिरवस्था:।
तिस्त्र आद्यलयशीलपराश्च पिण्डवृत्तिरूदितोर्ध्वसुषुम्णा।।
तिसृ शक्तिगुणकर्म सुषुप्तिजाग्रदादिक वपु: समवस्था:।
कर्मभोगफलद: प्रभुरेष: श्रीहरिर्हि परमेश्वर एते।।

भूताकाशलय-चिदाकाशाऽलयसुषुम्णेडापिंगलास्थितिपिण्डब्रह्माण्डैक्यसमाधिकृततत्तत्देवताकार्यसृष्ट्यन्तप्राप्ति पूर्वकर्मानुसार त्रिगुणकृतकर्मफलीयत्र्यवस्थाभोगसहकारप्रदपरमेश्वरीयज्ञानक्रियेच्छाशक्तित्रयनिष्ठोत्तेजकतापूर्व कर्मसापेक्षसृष्टि कर्तृभगवदवैषम्यादि निरूपणम्।

- षट्षष्टितमे- भगवत्साकारसगुणतोपनिषन्नामके

व्यूहवार्ताऽत्र षट्षष्टितमे सगुणनिर्गुणा:।
मूर्तिर्ब्रह्मप्रकाशोऽथो साकारोऽस्मीत्युदीरितम्।।

---

चतुर्व्यूहसगुणनिर्गुणस्फुटीकरणसदादिव्यमानववेषप्रभुसुदिव्यसुमूर्तसगुणसाकारभावविप्रपुत्रानयननिदर्शनसाधित भगवद्योगापन्नमायिकपदार्थदिव्यत्वंप्रकाशिमूर्तत्व-साकारोपासकैकान्तिकत्वादि प्रतिपादनम्।

- सप्तषष्टितमे- मुमुक्षुसद्गुणागमोपनिषन्नामके

दिव्यबुद्धिमति दिव्यसत्पुरूषगुणागमा।
न दोषग्राहके सप्तषष्टितमे समीरितम्।।

ऐकान्तिकसद्गुणि साधुगुणग्राहिसेवकस्य साधुगतसर्वगुणागम. साध्ववगुणग्राहिमुमुक्षोस्तु न सद्गुणागम इत्यादि वर्णनम्।

- अष्टषष्टितमे- भगवन्मर्यादोपनिषन्नाके

अर्चायां तु हरेश्च साधषु तथै बुद्धिर्हरे,
मर्यादा नहि यस्य तेषु च हरेर्यस्यास्ति नो निश्चय.।
श्रेयस्तस्य न नास्तिक: स उदितश्चास्तिक्यमीयाद् यथा,
ह्येतत्त्वष्टसुषष्टिकांऽक उदितं सत्संगसाध्यं हि तत्।।

मूर्तिसाध्वादिगतभगवतो मर्यादारक्षणं जगन्नाथमूर्तौ श्रीहरे: प्रवेशो मर्यादा रहितस्य भगवन्निश्चयाऽभावो नास्तिक्यं तदास्तिक्यार्थं नास्तिकप्रसंगतच्छास्त्रत्यागपूर्वकाऽऽस्तिकसाधुजनाऽऽस्तिक शास्त्र सेवनपरिशीलनादि प्रतिपादितम्।

- एकोनसप्ततितमे- अंहिसाधर्मोपनिषन्नामके

एकोनसप्ततितमे त्वहिंसाव्रतमुख्यता।
संकोचार्था तु शास्त्रोक्ता न मुख्या यन्महाव्रता।।

यज्ञीयहिंस्त्रधमपिक्षया साधवीयाऽहिंस्त्रधर्मे नि:श्रेयसकरं महाश्रैष्ठ्यं कामादिदोषराहित्यं मोक्षफलं राजवर्योपरिचरवसुधर्मराजयुधिष्ठिर निदर्शनं चोपपादितम्।

- सप्ततितमे- जीवमानसमृधोपनिषन्नामके

जीवमानसमृधं बलं द्वयोर्बाह्यसंग्रहतिसाधुसंगमौ।
निश्चयो दृढ इतीह सप्तति तमतरंग उदितं स्वमोक्षकृत्।।

आत्मगतसंस्काराणां युद्धं बहिरान्तरसाध्वसाधुबलिष्ठपक्षविजय साधुसंगतिजन्यभगवद्बलवृद्धिलभ्याश्रयनिश्चयमोक्षादिप्राप्ति:

---

सकामभक्तगतेष्टाऽपूर्तिजन्यनिश्चयाऽभावपूर्वकमोक्षहानिर्मोक्षलाभार्थकाश्रयकरणताविधानं कौरवपाण्डवयुद्धनिदर्शनपूर्वक भगवत्पक्षीयविजयवत्वं कर्मफलमर्यादास्थितिविशेषकृताराधनजन्यकृपाप्राप्यदु:खाऽऽल्प्यादि फलवत्वं चोपवर्णितम्।

- एकसप्ततितमे- सर्वब्रह्मात्मकसाकारोपनिषन्नामके

अक्षम्यो हरिणा स्वभक्तजनताद्रोह: स्वयं साकृति,
र्दिव्यन्राकृतितैक्यमेव च जगत्सर्वं खलु ब्रह्मण:।
साक्षाच्छ्रीहरिदर्शनेऽपि भवते धामेक्षणेहाऽपि सा,
नो कार्या गदितैकसप्ततितमे सर्वं हरिर्यत्र तत्।।

भगवद्द्रोहाऽकरणभगवत्साकारनिश्चायनेर्ष्याऽकरणधामभूलोकस्थश्रीहरिदिव्यैक्यभाव-सर्वस्वपरिजनान्वितावतरण-भगवद्योगाप्तयावद् दिव्यत्वादीनां निरूपणम्।

- द्वासप्ततितमे- श्रीहरिदिव्यदृष्ट्युपनिषन्नामके

माहात्म्यज्ञानमुक्तं हरिकृतिषु च निर्दोष द्रष्टि: शुकस्य,
दोषाढ्या सा परीक्षिद्दृगभिनिगदिता निश्चयोऽनिश्चयश्च।
यस्य स्याल्लक्ष्म चोक्तं मनुजहरिरथो दिव्य एवाऽक्षरेऽत्र,
द्वासप्तत्यास्तरंगे निगदितमुपमानं तथा वाऽवाग्ने:।।

भगवत्तत्साधुजनमाहात्म्यज्ञानं सहित निश्चयवत: कालकर्मण्यनिष्टं कर्तुमसमर्थे, भगवत्साधुजनादिबोधनिष्ठायां शिथिलस्य कल्याणाऽनिश्चय:, दीनदु:खदातुर्मिथ्यारोपकर्तु. पञ्चविधानां वृषभंगकर्तुश्च ब्रह्महत्यासमपातकम्, भगवद्दिव्यचरित्रलीलादीनां दिव्यभानं भक्तस्य, विमुखस्याऽपक्वभक्तस्य तु दोषभानम्, अक्षरातीतभगवत्स्वीकृतदिव्यमानववेषावस्थितानुकूलाऽऽचरित यावद्विधचरित्रनिष्ठकल्याणकारित्वज्ञप्तिमान् पूर्णभक्त., माहात्म्यज्ञानरहितनिश्चयवत्कल्याणसंशयो माहात्म्यसहितनिश्चयवत्कल्याणं ध्रौव्यम्-उत्तममध्यमकनिष्ठभक्तं लक्षणमित्यादिकं प्रतिपादितम्।

- त्रिसप्ततितमे- अनंगसांख्ययोगोपनिषन्नामके

कामो वीर्यमयो यतिक्षतिकर: सांख्ये च योगे स्थिति:,
श्रीकृष्णस्य च वल्लवीमुनिकृता निर्लपता शीलिना।
वैराग्यं वडवानलौपममथो निर्वासनं मानसं,
चाऽप्यं संगदितं त्रिसप्ततिवच: पीयुषसिन्धौ स्फुटम्।।

---

कामस्वरूपवीर्यनैष्ठिकोर्ध्वरेतस्त्वसांख्ययोगवर्तनोपासनाजन्यनिर्वासनिकतावैराग्यादिजन्य वासनाजयसत्पुरूषनिर्दोषबुद्धिजन्यगुणागमसमाधितेजोदर्शनपुनरागमनप्रत्यक्षभगवन्न्यूनभावमनोऽर्पणाऽनर्पणलक्षणादिस्पष्टं वर्णनम्।

- चतु:सप्ततितमे- श्रीहरीच्छारूच्युपनिषन्नामके

वैराग्येयत्तता चतु: सप्ततितम ईरिता:।
वृद्धि: पक्षश्च सत्संगस्यापि हरीच्छयाऽस्तित्वति।।

आपत्कालीनवैराग्यदार्ढ्याऽदार्ढ्यपरीक्षण-वैराग्याऽपेक्षितमहात्म्यज्ञानात्मनिष्ठोभयभगवद्जनाऽवाधकसत्संग पक्षजन्यशोकहर्षोद्भवाऽकिञ्चित्करत्वभगवदिच्छाऽधीना सत्संगाभिवृद्धिह्रासादि स्थिरमतिवत्वादि निरूपणम्।

- पञ्चसप्ततितमे- एकोत्तरकुलोद्धारणोपनिषन्नामके

स्नेहिभक्तकुलोद्वाराऽनुद्वारौ हरिनिश्चयौ।
पूर्णाऽपूर्णौ पञ्चसप्ततितमोक्तौ सलक्ष्मणौ।।

एकोत्तरशतादिभक्तस्नेहिकुलजानां समुद्धारो द्रोहिकुलजाऽनुद्वारो भगवन्निश्चयस्य दृढताऽदृढताश्चोपपादिता:।

- षट्सप्ततितमे- भगवत्प्रियतोपनिषन्नामके

क्रोधेर्ष्याकपटसुमानितादिदोषा यस्य स्युर्निहि सहरे: प्रियोऽनिकामी।
आज्ञास्थ: प्रिय इति चेरितं सलक्ष्म श्रीषट्सप्तति तमवीचिवाक्सुधायाम्।

क्रोधेर्ष्याकपटमानकामादिदोषरहित भगवद्वचनातिकष्टावसरस्थैर्यवत्सत्संगिभक्तविषयकश्रीहर्यतिप्रीतिपात्रतादि निरूपणम्।

- सप्तसप्ततितमे- भक्तकल्याणोपनिषन्नामके

त्रिंशल्लक्षणवांस्तु साधुरूदितो धर्मध्न इत्यासुरो,
देहत्यागविधौ सुखं न च सुखं देशादिसंगोद्भवम्।
देहावस्थकृतं च जायत इति स्वश्रेयसो निश्चयो,
भक्तस्थास्ति सुसप्तसप्ततितमे प्रोक्तं बलात्तद्धरे:।।

धर्मत्यागभगवज्ज्ञानभक्तिबलत आसुरत्वं गुरूद्रोहित्वं वचनद्रोहित्वं शुभाऽशुभकालावस्थानां शुभाशुभमृत्युप्रदर्शकत्वं मृत्युशोभनाऽशोभनत्वेऽपि भक्तश्रेयोऽभक्ताऽश्रेय: उपपादितम्।

---

- अष्टसप्ततितमे- विद्यार्थीप्रश्नोपनिषन्नामके

कर्मबलखण्डनं, सुस्थलीसेवनं, पक्वहरिनिश्चयोऽदोषबुद्धि:। पूर्वजनिसंस्कृतेर्बलजमूर्ते: स्मृति:, सर्वसत्संगिपक्षाऽनुरौच्यम्।। रिपुहतिर्विमुखता, साधुविश्वासिता, मद्दया दर्शनं, प्रेमहेतु:। धाम्नि भुवि चैकता नो, गुरौ दैवते ज्ञानपूर्वं, सतां संगयोग:।। हरिकथाकीर्तनं, पञ्चवृषपालनं, वृद्धिहेतुर्महित्वं मदीयम्। मत्क्रियाऽसंशयो, मदवताराऽर्पणं, साधुसेवादि मर्यादरक्षा। मेऽन्वयो रेकिता, वासनासंक्षयो, मोक्षणं, नास्तिकत्वस्य हानम्, मन्महिम्नश्चधीर्नवविधा भक्तिगा, नारकिद्वार दोषत्रयं च।। सद्गुरूस्थापनं चेति विषयाश्चेरिता इह। अष्टयुक् सप्ततिसंख्ये, तरंगे हरिणा स्फुटा:।।

## ।। दुर्गपुरप्रथमप्रकरणं समाप्तम्।।

# अथ सारंगनगरतरंगाः

- नवसप्ततितमे- मानसविजयोपनिषन्नामके

मनोजयस्त्वात्मसुनिष्ठयाततो, हरेर्महिम्नो विषयादिसञ्चय.।
विना महित्वप्रधियं क्वचिद्भयं तदाद्यसारंगवचोमृतेरितम्।

'जितं जगत् केन? मनो हि येन' इति पंक्तिमवलम्ब्य विषयजय-मनोजय-वासनानाशाऽऽत्मनिष्ठापरमात्ममाहात्म्य ज्ञानधर्म-वैराग्य-भवक्त्यादि वर्णनम्।

- अशीतितमे- भक्तभगवत्स्नेहोपनिषन्नामके

हरेर्मूर्तौ स्नेहो भवति खलु हेतुत्रिविधत.
सतामग्रे दैन्यं वचनविधमानं सुमतियुक्।
प्रसेवा देहाद्यैर्मनस उपदेशादि करणं,
सतां स्नेहश्चाशीतितमवचसाऽपीति कथितम्।।

केवलगुणजन्यस्नेहस्य विनश्वरत्वं, माहात्म्यज्ञानसहितगुणजन्यस्यकायिकवाचिकमानसिकसद्गुणजन्यस्य स्नेहस्याऽविनश्वरत्वम्, इन्द्रियाणां विषयतो परावर्तनम्, चक्षु:कर्णयोर्विशेषत: परावर्तनम्, तयोरनियमितयो. प्रशिक्षणम्, वैराग्यवृत्तिकसंयमिसदाज्ञानुवर्तिभक्ते भगवतो, भगवतित थाविध भक्तस्य च गाढाऽविचलस्नेहवत्वादि निरूपणम्।

- एकाशीतितमे- बाह्यान्तरपूजोपनिषन्नामके

बाह्यान्तरोपचारार्चा:, कथाकीर्तनभक्तता:।
एकाशीतितमे साक्षात्कारलक्ष्म तथेरिता:।।

सप्रेमबाह्याभ्यान्तरपूजनस्य श्रेष्ठत्वं श्रवणदर्शनाभ्या मनननिदिध्यासनोत्तरजायमान-नित्य-साक्षात्कारशाश्वत्वं सुश्रद्धामाहात्म्यज्ञानसहितकृतसाधनजन्यपरमसाक्षात्कारस्य नित्यमूर्तिस्फुरणात्मकस्य मोक्षगतिप्रदत्वमित्यादिकं प्रतिपादितम्।

---

- द्वयशीतितमे- आत्मानात्मविवेकोपनिषन्नामके

आत्मानात्मविवेकात्मनिष्ठा निर्वासना यत:।
सवासनगतिर्द्वयशीतितमे इह।।

आत्माऽनात्मदृढविविक्तिनिजात्मनिष्ठासहभगवदीयमाहात्म्यज्ञप्तितज्जन्यपक्वनिर्वासनिकत्वप्राप्तितदपक्वताप्रयोज्यस्वर्गाद्यात्मक निरयमुक्तितदुत्तरमानवादिजन्मकृतपक्वतां पूतित तदुत्तरवर्ष्मविगमोत्तराऽक्षरधामगतिमुक्ति प्रतिपादनम्।

- त्र्यशीतितमे- नामकीर्तनमहिमोपनिषन्नामके

हरेर्नामोच्चारणादि दत्तेन मनसा कृतम्।
फलदं नान्यथा त्र्यशीतितमे वचसीरितम्।।

निर्वासनिकत्वहेतु-जडचेतन-साधर्म्यवैधर्म्य-जीवेश्वरब्रह्मान्वयव्यतिरेकज्ञानसमनस्क-भगवद्दर्शनस्पर्शकीर्तनादिजन्य-संस्कार द्वारकसततस्फूर्ति मोक्षादिप्रदर्शनम्।

- चतुरशीतितमे-त्र्यवस्थाचतुर्वाण्युपनिषन्नामके

त्र्यवस्थामिश्रणं वाणीचतुष्टयमपीरितम्।
चतुरशीतितमके जीववैराजदेहगम्।।

त्र्यवस्थामिथ: स्थिति:- चतुर्वाणीस्वरूपात्मकशब्दब्रह्मनिरूपणम्।

- पञ्चाशीतितमे- नैमिषारण्यक्षेत्रोपनिषन्नामके

मनोवृत्तिशमो यत्र नैमिषारण्यमेव तत्।
पञ्चाशीतितमे प्रोक्तं क्षेत्रं कल्याणकृत्त्विह।।

मानसेन्द्रियवृत्तिकुण्ठततात्मकनैमिषारण्यक्षेत्रतदुपचरितसत्संगात्मकसाधननिरूपणम्।

- षडशीतितमे - ईर्ष्यात्यजनोपनिषन्नामके

षडशीतितमे लक्ष्म त्वीर्षायास्त्यजनं तथा।
कारणं मानमेवास्या: क्रोधादीनां तथेरितम्।।

मानजन्येर्ष्यादिदोषत्यागकारकसत्संग निर्देश:।

- सप्ताशीतितमे- युगधर्मप्रवृत्युपनिषन्नामके

---

कर्मप्रवृत्त्यैस्तु गुणैर्युगानां धर्मप्रवृत्तिस्त्वथ तामसघ्नः।
सत्संग उ स्थानवृषोऽत्र सप्ताशीतिप्रवीचौ कथिता पदार्था.।।

पूर्वसंस्कारजन्यत्रिगुणाक्रमणोत्थचतुर्युगधर्मान्यतमसुपरीक्षणपूर्वकभगवद्ध्यानादिकरणसर्व कर्मार्पण-साधुसमागमस्थानार्हणादिनिरूपणम्।

- अष्टाशीतितमे- धर्म्यधर्म्युपनिषन्नामके

धर्म्यधर्मिजनांगानि धामान्यन्तर्बहिर्दृशाम्।
अग्रे दूरे च सत्सेवाऽष्टाशीतितम ईरिताः।।

धर्म्यधर्मिजनलक्षणान्तर्दृष्टिमद्बहिर्दृष्टिमज्जनसापेक्षभगवद्धामान्तिकत्वदूरत्वं-निजात्म स्थभगवत्सहधाम
दर्शनवत्वाऽन्तर्दृष्टिमत्साधुसमागमकरणविधान-सत्संगकृन्मुक्तसमत्वलाभादिकं निरूपितम्।

- नवाशीतितमे- पुमर्थकृपोपनिषन्नामके

पञ्चांगजन्यपुरूषार्थयुते कृपा स्यादेकान्त भक्त इति सः क्षतिरेकतश्चेत्।
मद्धाम याति न ततः क्षतिरर्दनीयाऽशीतित्यूर्ध्ववीचिनवमे हरिणेरितं तत्।।

वैराग्याद्यष्टगुणात्मकपुरूषप्रयत्नवन्निष्ठ-भगवत्कृपाप्रतिपादकस्य
कृपापात्राऽक्षरधामगतिप्रदर्शकस्य न्यूनगुणिजनलभ्य-धामान्तर देवलोकादिप्रदर्शकस्य न्यूनतापरिहारकसाधुसमागमावेदकस्य जन्मजन्मान्तरसंसिद्धि प्रतिपादनम्।

- नवतितमे- आत्मस्वरूपविचारोपनिषन्नामके

अखण्डसाधुस्थ गुणास्तथेतरे देहात्मबुद्धिर्न कथं निजात्मनि।
ब्रह्मत्वविक्तिर्विमले स्वचिन्तनं प्रोक्तं नवत्यंकगमे तरंगके।।

साधुस्थस्थिरोऽस्थिरगुणदेहात्मपृथग्विचारब्रह्मरूपात्मनिष्ठभगवद्ध्यानकरणादि प्रतिपादनम्।

- एकनवतितमे- भगवन्निश्चयोपनिषन्नामके

शास्त्रजश्रीहरिकृष्णभगवदृतनिश्चयः।
उक्तौ दृढश्चैकनवतितमे निजभक्तगः।।

---

शास्त्रीयसाधूपदिष्टभगवत्वनिश्चयाऽविचलत्वशास्त्रीयधर्मप्रवृत्तिक-लोकव्यवहार-स्थिरत्व-भगवद्यावच्चरित्र दिव्यनिश्चयजन्यकल्याणफलवत्वं च निरूपितम्।

- द्विनवतितमे- धामगताऽपुनरावृत्युपनिषन्नामके

पातो हेतुचतुष्ट्यान्वितजनस्य स्यान्न धाम्नो हि मे
सूक्ष्मस्थूलतनूत्थकर्मसमतामोह प्रमादावरी।
त्याज्यौ चोपशमस्थकर्मलयताऽज्ञानी तु याम्यप्रगो
ज्ञानी धाम सुयाति चेति नवतौ द्वयूर्ध्वे तरंगे स्थितम्।।

धामाऽपतनभगवदिच्छाविहरण-स्थूलसूक्ष्मदेहतत्व-तत्कृतसाऽभिमानकर्मसम्बन्धसमफल- निरभिमानकर्माऽसम्बन्धभागवत्ज्ञानिभक्तलभ्य साकारात्मचैतन्यधनमूर्तिमुक्तिदेहाभिमानिलभ्ययाम्यगतिनिरूपणम् कृतम्।

- त्रिनवतितमे- द्वित्रविधभक्तगोप्युपनिषन्नामके

मात्रप्रेमिजनस्तु नोत्तम इति न्यूना तु देहात्मधी
गोपीप्रीतिरतीव वेगजनिता प्रोक्तोत्तमा ज्ञानत:।
आत्मज्ञानं विरागनिष्ठजनकृद्भक्ति र्हि सर्वोत्तमा,
वार्बीजादिनिदर्शनं त्र्यधिनवत्यंके तरंगे स्थितम्।।

केवलप्रेमवद्भक्तापेक्षया धर्मज्ञानवैराग्यभक्तिमत्प्रेमयुग्भक्तस्य श्रैष्ठ्यं गोपिकावत्सदा भगवत्प्रसन्नतापात्रप्रीतिमत्वं केवलप्रीतिमतो मायिकविषययोगे पतनं ततो भगवद्भक्तिरैकान्तिकविधया कर्तव्येति प्रतिपादितम्।

- चतु:नवतितमे- बदरीशतपस्योपनिषन्नामके

भक्तानुग्रहहेतुके तपसि वै कोलीश्वरो वर्तते,
तेन स्यात्तु समाश्रितीयहृदये साक्षाद्हरेर्दर्शनम्।
श्रेयश्चापि सुभक्तियुक्तजनताया:, स्यात्तरंगे त्विह,
प्रोक्तं तत्तु चतु:सुयुक्त नवतीत्यंके तरंगे स्फुटम्।।

नरनारायणभगवता भक्तानां श्रेयोऽर्थकधर्मज्ञानादिगुणोद्भवार्थक-जीवात्मगताऽक्षर-ब्रह्मप्रकाशस्थनिजमूर्तिदर्शनफलार्थकस्य कृतस्य तपसो निरूपणम् कृतम्।

- पञ्चनवतितमे- अधिकाधिकमहिमोपनिषन्नामके

भक्तानां शुचिता ह्यपास्तित इति श्रीस्वामिनो वै यथा

---

ज्ञायेतेऽप्यतिगे महत्त्वपरते धामस्थित श्रीहरेः।
दृष्टान्तोऽत्र पिपीलिका सुचटकातिमीशपक्षीशयो
वार्धौ खे शलभेन्दुजो नवतियुक्तपंचाकवीचीरीतम्।।

स्वल्पप्रकाशजीवस्योपासनयो खद्योतमरीचिशककीटिकादीनां महातेजोऽक्षरमुक्तव्योममहासागरघनाऽनन्ताऽपारमहत्ताभानेनेव भगवच्छ्रीहरेरेव सर्वावतारि सर्वोपरित्वाऽपारमहत्वागमेन सेवाभक्तिमत्तायां स्थितिरिति प्रतिपादनम् कृतम्।

- षण्णवतितमे- कल्याणकारिगुणागमोपनिषन्नामके

सत्संगाद्यैर्धर्मवृद्धिः कुसंगात् ह्रासोऽज्ञानाज् ज्ञानिसंश्रेष्ठतादि।
प्रोक्तं सम्यक् षण्णवत्यंकवीचौ नित्याऽऽयाऽऽदि श्रेष्ठिलेख्यं यथावत्।।

साधुसमागमद्वारकदुर्गुणनाशसद्गुणागमकुसंगनाशात्मज्ञानविवेकजन्य प्राचीनप्रकृतिस्वभावनाशाऽवस्थाजन्य-दुर्गुण विनाशमोक्षगतिलाभादिकं निरूपितम्।

**।।इति सारंगपुरस्य 18 तरंगाः।।**

## ।।अथ कार्यायनतरंगाः।।

- सप्तनवतितमे-कीटभ्रमरीदिव्यतोपनिषन्नामके

नन्विन्द्रियप्राणमनोऽहमाचित्प्रध्यात्मसु श्रीहरिदिव्यनिश्चय.।
निरंजन: साम्यमुपैति सप्तयुङ्नवत्यभीष्टे हंरिणेरितं स्फुटम्।

भगवन्निश्चयस्य देहेन्द्रियाऽन्त:करणजीवादिषु स्फुटीकरणकरस्य भक्तदेहेन्द्रियाऽन्त:करणैर्दिव्यतामापन्नैर्भगवतो भगवदिच्छया प्रत्यक्षीकरण विवेचनकरस्य श्रुतिसमन्वयपरस्य माहात्म्यज्ञानप्रेमभक्तिमत: सारूप्यमुक्त्यवाप्ते: केवलात्मनिष्ठस्य ब्रह्मतेज: कैवल्यपातस्य च विवेचनम्।

- अष्टनवतितमे - शापितबुद्धिशुद्ध्युपनिषन्नामके

न स्याच्छापितबुद्धिरत्र सुगुणग्राही क्वचित् किन्तु स.
स्याद् वा सद्व्रतपालनाधिकतमश्चेत् संभवेच्छुद्धधी:।
कर्माऽमूर्तमथास्य मूर्तसदृशं भोग्यं फलं बुद्ध्यते,
प्रोक्तं श्रीहरिणाऽष्टयुङनवतिवीच्यंके स्फुटं सर्वथा।।

भगवत्तत्साधुजनाऽवगुणग्राहिशापितबुद्धिशोधकाऽधिकवर्तमानवर्तमानधर्माचरणादिविधे. सर्वकर्मजन्यदेहस्वर्गनरकादि-सुमूर्तफलदर्शनस्य च प्रतिपादनम् कृतम्।

- नवनवतितमे- साधुवृत्तोपनिषन्नामके

---

गुणानां दोषाणां चिरपरिचयादीक्षणमत:,
सुबाल्याद् रूच्याद्यैर्भवति मुनिता निश्चय इति।
दमश्चात्मज्ञानं स्थितिरविचला चेति कथितं,
स्फुटं साधोर्वृत्तं नव-नवतिवीचौ तु हरिणा।।

कामक्रोधादिदोषनाशार्थकशमदयादिसाधनावश्यकत्वैकान्तिकसाधुसमागमावश्यकत्वाऽऽश्रमाऽघटितदुर्गुणाभिलाषादिकुत्सित्वादिनिरूपणम् कृतम्।

- शततमे- जीवसाक्षिज्ञातृतोपनिषन्नामके

जीवस्य साक्षिणो ज्ञातृत्वं व्यापित्वं च मूर्तता।
प्रोक्ता शततमे स्पष्टा हरिणा तु यथायथम्।।

देहादौ जीवात्मनो ज्ञातृत्वं साक्षिणैक्येन साक्षिणो ज्ञातृत्वं यावत्तावदेव साक्षिणस्तु कर्मफलप्रदातृत्वेनाऽऽधिकं तु पृथक् मूर्तस्य व्यापकत्वं शक्त्यादिभिर्निराबाधात् स्वात्मतेजसि अक्षरे व्यापके परमात्मनि दर्शनाभ्यासे सिद्धौ सत्यां सार्वज्ञ्यमपि स्यादितिनिरूपितम्।

- एकोत्तरशते- सहेतुकाऽऽविर्भावोपनिषन्नामके

हरे: प्राविर्भावो भवति निजभक्तार्तिहरण:,
स्वभक्तानन्दार्थस्तदितरजनानां हितकर:।
वृषस्याऽवस्थित्यै विचरति हरिर्भूमिवलये,
तरंगे तेनोक्तं सपदि हि तदेकोत्तरशते।।

धामस्थ श्रीहरे: कल्याणं कर्तुं समर्थस्य भुव्यवतरणे एकान्तिकभक्तप्रीणनार्थमितिमुख्यहेतुप्रदर्शनमं कृतम्।

- द्वयाधिकशततमे- निर्मत्सरप्रसादोपनिषन्नामके

श्रेष्ठाऽम्बरार्पणमु भक्तिमति प्रसादो,
मात्सर्यहेतुरपि सत्सु न तत्तथोक्तम्।
मद्देहधारणमपि स्वजनार्थमेतत्,
प्रोक्तं द्वयाधिकशताऽक तरंगकेऽत्र।।

मत्सरतत्कारणतन्नाशलच्छुद्धिलद्द्रष्टांततत्सिद्धान्ततज्जन्यपूर्णकामनादिवर्णनम्।

- त्र्यधिकशततमे- गृहिशान्तवृत्त्युपनिषन्नामके

गृहस्थानां वृत्तिस्त्वविचलपदा स्याद्भगवति,
विरागोत्पत्तेः साधनमपि च लक्ष्मापि गदितम्।
प्रमोक्षस्य ज्ञानं सुमहिमयुतं त्र्यूर्ध्वशतके
तरंगे यथार्थ्य गदितमपि दृष्टान्तसहितम्।।

देहदैहिकसम्बन्धिममतात्यागभगवन्मूर्त्यनिशयप्रीतिःसत्संगदृढचरकीवैराग्यशरणवलधामस्थ ाभूमिस्थ भगवत्स्वरूपैक्यज्ञानात्माऽऽत्यन्तिककल्याणशाश्वतपरिपक्वसिद्धदशादिपदार्थनिरूपणम् कृतम्।

- चतुरधिकशततमे- सगुणनिर्गुणोपनिषन्नामके

निर्गुणं च सगुणं हरिरूपं तज्ज्ञभक्तफलमुत्तममुक्तम्।
स्थूलसूक्ष्ममखिलात्म तदेव तुर्थयुक् शततमेऽत्र तरंगे।।

भगवतोऽणुत्वमहत्वयोर्निर्गुणत्वसगुणत्वशक्त्याकयोस्तु ज्ञातु. निर्भीकतात्मकफलस्य चाऽक्षरगतशक्तिरूपस्य चानन्तशक्तियुग्भगवतश्चनिरूपणम् कृतम्

- पञ्चधिकशततमे- शेषावगुणत्यागोपनिषन्नामके

असाधुरूक्तो मलिनातिरोषवान् हरेर्जनानां महिमज्ञ एव तु।
सत्संगिवर्योऽस्ति हि पञ्चयुक्शते तरंगके प्रोक्त उदार सद्गुणी।।

सतां भगवतश्चातिशयमाहात्म्यविदां दोषदर्शनादिजन्यरोषग्रन्थिराहित्यम्, दिव्यदृष्टिमत्वं साधुत्वं तदन्यस्याऽर्धसत्संगित्वं च निरूपितम्।

- षड्धिकशततमे- भगवच्चिकीर्षितोपनिषन्नामके

श्रेयोहेतुः सर्वकर्तृत्वबुद्धिः स्वेष्टे कृच्छ्रं तत्प्रसादस्य हेतुः।
कालादौ कतृकत्वबुद्धिर्हि पापं त्यागे लक्ष्मोक्तं दशोर्ध्वे शतेंऽके।।

भगवत्प्रसन्नतासाधनं त्यागतपोयुक्ता भक्तिः, भगवन्निष्ठसर्वकर्तृत्वं ज्ञानं मोक्षसाधनं, तपो भगवत्प्रसन्नताकारणं, भगवत्सर्वकर्तृत्वाद्यज्ञानिजीवस्य महाकल्मषित्वम्, भगवदुपासनया सर्वनियामकत्वं विना सर्वथा भगवत्सारूप्यप्राप्तिः निष्कामभावनया प्रेमलक्षणाभक्तिकरणं, निजद्रष्टांतेनौत्सुक्यवतो विघ्नानाम किञ्चित्करत्वं, सकामनिष्कामभक्तवर्तनं, मोक्षेऽपि स्वामिसेवक भावनाध्रौव्यमित्यादिकं प्रतिपादितम्।

- सप्ताधिकशततमे- भगवदाज्ञावर्तित्वोपनिषन्नामके

अभंगश्चाज्ञाया मम भवति सत्प्रीतिजनको,

---

जगद्वस्तुत्यागो मम विषययोगे जनहृदि।
वसाम्यत्रप्रेमास्पदसुनिजभक्ते हरिरहम्,
तदुक्तं सप्तोर्ध्वे शततम तरंगेऽत्र हरिणा।।

अतिप्रीतिमताऽपि भक्तेन भगपदाज्ञा दूरदेशादि प्रेषणरूपा नोल्लंघनीया, प्रियतमस्य निजसहयोगिमूर्त्या भक्ते सर्वसुखदानसमर्थत्वात्, आज्ञालोपाभावस्य प्रीतिज्ञप्तिलक्षणत्वात्, आज्ञांकिते भगवन्निवासादित्यादिनिरूपितम्।

- अष्टाधिकशततमे- जीवेश्वरमायाभेदोपनिषन्नामके

माया दह्यति कारणाख्यतनुभा ध्यानेन वै श्रीहरे.।
सूक्ष्मे वर्ष्मणि जायते सुमननाज्ज्ञानं तु जीवाऽन्तरे।।
वार्तानां श्रवणेन निर्विषयकं हृज्जायते निर्मलं,
ह्यष्टोर्ध्वे शतके तरंगक इदं प्रोक्तं हरेश्चिन्तनम्।।

जीवस्यकारणशरीरात्मकमायाभेदसाधनस्य भगवद्ध्यानस्य मननद्वारा जीवात्मप्रमाणित ज्ञानस्य संस्कारदादर्यस्य मनोनैर्मल्यकारणस्य भगवत्प्रतापस्य च वर्णनम्।

## ।।इति कार्यायन तरंगाः।।

## ।।अथ लोहनगर तरंगाः।।

- नवाधिकशततमे- शंकरार्थनिर्वेदसत्संगोपनिषन्नामके

अर्थः शंकरशब्दजन्य उदितः क्रोधः श्वलालासम.,
कामो नाश्य इतिरितस्त्रिविधवैराग्योऽपि संकीर्तितः।
त्रेधा ज्ञानमथाऽकृतार्थमतिता सत्संगसम्पूर्णता,
सन्माहात्म्यगुणगुहो नवयुते प्रोक्तस्तरंगे शते।।

तामसराजसदेवानामनुपासनाया, क्रोधस्य कामस्य त्याज्यताया, वैराग्यस्य भगवज्ज्ञानस्य त्रिविधतायाः, अकृतार्थत्व-कृतार्थत्वमानितताया, विकाराणां

---

विनाशितायाः, सत्संगस्य सम्पूर्णतायां हेतूनां निरूपणायाः, देहाभिमानिविमुखतायाः, दीनभावेन साधुप्रसन्नतायाश्च वर्णनम्।

- दशाधिकशततमे- मृत्युभयनिवृत्युपनिषन्नामके

मृत्योर्भयस्य नशनं स्वकृतार्थताऽपि, स्वांगप्रधानमिह मुनि[illegible]ऽपि।
कार्यस्य कारणमहत्वमथाऽप्यणुत्वं, प्रोक्तं स्फुटं दशयुते शतके तरंगे।।

ज्ञानिशूरविश्वस्तप्रीतिमद्भक्तस्य मृत्युभयराहित्यस्य पूर्णकामतायाः परमनिःश्रेयसश्च कारणस्याऽल्प्येऽपि महाशक्तिमत्तथा कारणस्य तस्य महत्वमितिसिद्धान्तितम्।

- एकादशाधिकशततमे- समहात्म्योपनिषन्नामके

मे मत्सतां महिमनिश्चयवाँस्त्यजेत्स्वं सर्वं स याति मम लोकमकालमृत्यौ।
याम्यं प्रयाति विमुखस्त्विति चोक्तमत्र त्वेकादशाधिकशतांक तरंगके वै।।

भगवत्तत्साधुवचनपालनपूर्वकसर्वस्वार्पणादिलक्षणव्यावर्त्त्यं भगवत्तत्साधुजनपरिपक्वमाहात्म्यज्ञानयुतनिश्चयसहित भक्तिमन्नरनारीद्रष्टान्त सहकृत श्रीहरिकृतगुर्वाज्ञापालनादि दृष्टांतपूर्वकसाधनसाध्यफलादि प्रदर्शनम् कृतम्।

- द्वादशाधिकशततमे- प्रत्यण्डश्रेयोरीतिसाम्योपनिषन्नामके

ब्रह्माण्डेषु हरिर्यथेष्टमभियात्येकस्त्वनेकाकृतिः,
मुक्तेः पद्धतिरस्ति चैकविधिना हेमन्तसिंहस्य तु।
औदासीन्यमृते हरिं निगदितं सत्वे हरेः प्रीतता,
प्रोक्तं द्वादशसंख्य कोर्ध्वशतक कलृप्ते तरंगे स्फुटम्।।

स्वधामस्थश्रीहरिकारिताऽनन्त ब्रह्माण्डगताऽनन्तस्वरूपात्मक निजदर्शनस्य, स्वीयशाश्वतैकमानमूर्तिमूलकयथेष्टानन्तमूर्तिधारणयावदपेक्षैश्वर्यप्रकाशप्रदर्शनस्य, स्वीयसार्वदिकद्विभुजमूर्तिमूलकचतुर्भुजसहस्त्रभुजादि स्वरूपमत्स्यकच्छाद्यवतारधारणस्य, एकदेशस्थनिष्ठान्तर्यामिविविधयावत्पदार्थव्यापकतासामर्थ्यस्य, निजस्वरूपदिव्यत्वादिवन्निष्ठयावन्मायोत्तरणस्य, अवतारिगोचरैकविधकल्याणरीति निष्ठपात्रोपासनादिभदे प्रयोज्य श्रेयोरीति विभिन्नत्वस्य स्वेतराऽनाप्तस्वसमत्वस्य, भक्तजनगतस्वचिकीर्षितनिरासपूर्वकव्याकुलताद्यकारणस्य विवेचनादिकम्।

- त्रयोदशाधिकशततमे- करणविजयोपनिषन्नामके

नैष्कार्पट्यं परिचयमथोनिश्चयाऽपातपादो,
निर्दम्भित्वं दृढहरिमतिश्चेन्द्रियाणां जयेऽपि।

---

हेतुश्चान्त:करणविजये प्रोदिता वै शतोर्ध्वे,
स्पष्टा: सम्यक् त्रियुतदशके वै तरंगे स्वयं यत्।।

कपटिनिष्कपटिलक्षणकपट्यभिज्ञानोपायप्रतिष्ठाभंगजन्यदम्भप्रकाशन-दुष्टसंकल्पजन्यधर्मपतन भगवन्निश्चयपतनसाधुगुणग्राहिसत्संग दृढस्थिति ऋषीकान्त. करणजययुक्तिप्रदर्शन साधनपार्थक्यादिवर्णनम्।

- चतुर्दशाधिकशततमे- परमहंसव्यवहारप्रश्नोपनिषन्नामके

"इहैकान्तिकत्व तु वै दुर्लभं, चापि निष्कामिता, निश्चय. श्रीहरेर्ग्रन्थिनाशोऽपि, मानादनिष्ट भवेत्, सत्वहीनस्य वै त्याग उक्तस्तु दोषादिनाशे प्रयत्नार्थिसंगश्च, यो मद्बलाऽनाश्रित: स्यात् त्यजेत्तं तथाऽशिक्षकं वै त्यजेत्, बोधदं चाश्रयेन्नाऽऽश्रयेत्वालसं, श्रेष्ठमानित्वं संगं न कुर्यात्, स्वसम्बन्ध्य निन्दापरस्यापि संगं न कुर्याच्च, दीने तु भक्ते न मानं विदध्याद्, विद्ध्याच्च्युते वै।। प्रगन्तव्यमाज्ञापरं, प्रेमधार्यं न वै दर्शने, तद्विरोध्यग्रतोमत्प्ररक्ष्या प्रशस्ति, स्त्वधर्मं वचो मे न मान्यं तथा ध्यानकाले तु संकल्पदोषे तु ये प्रार्थना, वर्तनं साम्यतो, देहवादे। कुदोषागमश्चात्मनिष्ठा गुणप्राप्तिदा, सेवान्मे प्रकाशो, जगत्सेवनादन्धता, कुस्थलेऽस्थेयमेवं, तु मे साकृतिर्यत्र शास्त्रेऽस्ति वाच्यं. न चान्यत्, चतुभिर्युति वै दशांके शतोर्ध्वे सयुक्तम्।।

- पञ्चदशाधिकशततमे - परब्रह्ममूर्तिसाक्षात्कारोपनिषन्नामके

साक्षाद्दर्शनमेव मोक्षकृदन: शास्त्रज्ञ एवाऽपि तद्,
व्यूहोऽहं त्ववतारधृक् त्रिमतिभिर्ज्ञेय: सुपर्णं विदा।
कैवल्यार्थ्यविमुक्तिभागहमपि ब्रह्मान्वयि व्यापक:,
प्रोक्तं मे प्रकृतिद्वयं त्विह शतोर्ध्वे पाञ्चदश्ये स्फुटम्।।

भगवत्प्रत्यक्षदर्शिशास्त्रदर्श्युभयसमकल्याणवत्वस्य, व्यूहावतारादिधारणकृद्भगवज् ज्ञानिजनकल्याणवत्वस्य, 'ऋते ज्ञानान्नमुक्ति' रिति श्रृत्युक्त प्रत्यक्षभगवज्ज्ञानपरिपाक भक्तिलभ्यात्यन्तिककल्याणस्य, त्रिविधत्वन्यूनज्ञानिनिष्ठजन्ममृत्युतरणाऽभावस्य कैवल्यार्थिनिराकारि ब्रह्मज्ञानिनिष्ठकल्याणाप्रसक्तिपूर्वक भक्त्यधिकारित्वस्य, जडचेतनप्रकृतिगताऽक्षरब्रह्मात्मकशक्तिद्वारक सूक्ष्मस्थूलावस्था सञ्चालकशरीरिभगवत्परब्रह्मात्मकमदाधारक तदुभयान्विताऽक्षरब्रह्मस्वरूप परब्रह्मस्वरूप निर्लेपत्वस्य, त्रिधामदीयाऽपरोक्षानुभूतिमत्तदपरोक्षानुभूतिस्वरूपयोग्यतावत्तदुभयलभ्य समानाऽऽत्यन्तिककल्याणवत्वस्य, निराकारिब्रह्मकुद्दालकि शुष्कवेदान्तिजनगतस्याऽऽत्यन्तिककल्याणाऽभावस्य सामान्यकल्याणाभावस्य प्रत्युत निरयपातस्य च प्रतिपादनम् कृतम्।

- षोडशाधिकशततमे- दोषवर्जनगुणोपार्जनोपनिषन्नामके

सतांदोषग्राहे चतुरसुमतेर्हेतु रूदितस्तथा कामादीनां मृदुसुरभसोर्हेतुरपि वै।
विनाशोदोषाणां गुणसमुपलाभे स कथितो दशाढ्ये षट्प्रान्ते शततम तरंगेऽत्र
हरिणा।।

अयोग्यस्वभावाऽरूचिकप्राज्ञस्याऽवगुणग्राहिमूर्खस्य, कामादिमन्दीकरणार्थकाऽऽहारशून्यतायुक् साधुसमागमिभक्तस्य, व्यसनह्रासवृद्धियोस्य, प्राग्भवीयैतद्भवीयशुभाऽशुभप्रकृतिस्वभावस्येन्द्रिय चाञ्चल्यनिवर्तकोपायस्य-रसनाजयस्य-सर्वेन्द्रियचाञ्चल्यानुमितकामव्यापनस्यशान्तचञ्चलभाव विनिमयस्य-सच्छास्त्राष्टकगतस्वांगमिलिनप्रकरणग्राह्यत्वस्य श्रद्धामतो वृद्धिमत्वस्य च प्रतिपादनम् कृतम्।

- सप्तदशाधिकशततमे- धर्मादिचतु:कारणोपनिषन्नामके

धर्मज्ञानविरागाणां भक्तेरूत्पत्तिहेतव:।
उक्ता: सप्तदशाढ्ये वै शतांके हरिणा स्वयम्।।

श्रीहरिप्राप्तिफलवद्भक्तिपर्यवसित धर्मादिचतुर्व्यूह साधननिरूपणम्।

- अष्टादशाधिकशततमे- भगवत्स्नेहवैविध्योपनिषन्नामके

कर्मधारा: प्रभेदा: हरिगत विविधे स्नेहतीव्रत्वमान्द्ये,
वेगास्त्रेधा भवन्तीन्द्रियकरण चितां योगतंस्तत्क्रमाद्वै।
वने स्नेहो लोके मयि स्यादशुभशुभगदेशादिजन्यो,
विभिन्न: स्थेयं नो देशकालप्रविषमभवनेह्रन्कलौ ध्यानरोध:।।
मूर्तिर्बाह्या तदेक्ष्या मृदुसमतिरभोबुद्ध्युपायास्तथोक्ता:,
स्त्रीदु:खज्ञस्य न स्याद्विकृतिरथ मयि ब्रह्मणि ब्राह्ममुक्ते।
माहात्म्यज्ञस्य सौख्यं भवति तु सुखदा त्वस्य मायापि चैतत्,
प्रोक्तं त्वष्टादशोर्ध्वे शततमक तरंगे श्री हरेर्वाक् सुधाया:।।

कर्मभेदजन्यस्नेहभेदानां जीवमनोहृषीकसमुच्चयाऽसुच्चयकृतवेगत्रिविधताया:, शुभाशुभपदार्थस्नेहवत्ताया:, विषमदेशकालादिकाऽपराभवस्थिति कर्तव्यताया:, हृत्कलौ ध्यानाऽकर्तव्यताया:, विवेकज्ञानभगवन्मिहिमभगवत्तत्साधुजनविश्वास दृढाश्रयवतो मायाया सुखदत्वस्य, अभक्तानां मन्दाश्रयाणां च मायाया दु:खदत्वस्य च वर्णनम् कृतम्।

- एकोनविंशोत्तर शततमे- सदसत्पुरूषबोधोपनिषन्नामके

शास्त्रात्सत्पुरूषस्य बोधनमथाऽसन्मानवस्यापि तत्,

---

मूर्तिर्या मिलिताऽत्र कार्यमनिशं ध्यानं न चान्यस्य वै।
पातिव्रत्यमिदं सतां मुखजनि: शास्त्रश्रुतिस्तूत्तमा,
संप्रोक्तं नवयुग् दशोर्ध्वकशतांकाढ्ये तरंगेऽत्र तत्।।

सर्वब्रह्मैक तत्त्वधीमतोऽसत्पुरूषत्वस्याऽऽत्मपरमात्मादिविविधतत्त्व धीमत· सत्पुरूषत्वस्य, भगवदवतारादिध्यानस्य . प्राप्तस्वरूप विषयक मुख्यध्यानस्य पार्वतीवत् पतिव्रताभक्ते: सत्पुरूषद्वारक सच्छास्त्रश्रवणविधेश्च प्रतिपादनम् कृतम्।

- विंशोत्तरशततमे- सविकल्पनिर्विकल्प निश्चयोपनिषन्नामके

द्वैविध्यं हरिनिश्चयस्य विशदं षड्धा भिदा लक्षितं,
श्रद्धाभेदकृतं श्रुतं च कथितं देशादिसद्योगजम्।
शीघ्रं वाऽथ चिरं तु निश्चयविधावुत्कृष्टता लभ्यते,
विंशत्यूर्ध्वशतांकवीचि कथितं स्पष्टं च द्रष्टान्तत.।।

सविकल्पनिर्विकल्प द्विविधनिश्चयस्य गुरूगत देशकालाद्यष्टशुभाऽशुभत्वप्रयोज्यानां शिष्यगतश्रद्धातीक्ष्णत्वमन्दत्वप्रयोज्यानाम्, अवान्तरभिन्नज्ञानादि विषयाणां षड्भेदानां तत्रोत्कृष्टसाधनानां चोत्कृष्टंवर्णनम् कृतम्।

- एकविंशोत्तरशततमे- देशकालाऽपराभवोपनिषन्नामके

देशाद्यैरपराभवादि विषयो भक्तो हरेर्वै भवेत्,
मुक्तानां च हरौ भिदा ह्युडुनिशानाथोपमा निश्चिता।
साम्यज्ञास्तु मता: सुदृष्टमतिन: साम्यं हरेर्नान्पगम्,
प्रोक्तं श्रीहरिणा स्वयं त्विह शतप्रौर्ध्वैकविंशे स्फुटम्।।

निर्विकल्पस्थितिकश्रीहरिचरणमग्नभक्तनिष्ठाऽसद्देशकालादिकृताऽपराभववत्ताया , नारायणभिन्नस्य तदन्यभक्तस्य तु तत्पराभवताया.,' धामगतमुक्तभगवद्भेद निरूपकताराचन्द्रभृत्यभूपतिभेदोपमाया. नारायणान्वितजीवेश्वरादिगतभगवत्त्वोपचारतायाश्च निरूपणम् कृतम्।

- द्वाविंशोत्तर शततमे- श्रीहर्यभिप्रायरूच्युपनिषन्नामके

आचार्याणां विविधमतजुषां मे रुचिश्चेरिताऽपि,
विश्वास्यं नो मन इति भगवत्प्राविरायोऽसमश्च।
मूर्तिं चष्टेऽक्षरपदगशुभां नो निराकारमस्ति,
द्वाविंशाढ्ये शततमवचने मूर्तमूक्तास्तथोक्ता:।।

---

मतमतान्तराऽऽचार्याभिप्रायाणां स्वाभिप्रायस्य - अक्षरधाम तत्रत्यमुक्तपरब्रह्मसाकारसगुणोपासनाभक्तिकरणोपदेशस्य, मानादिदोषनाऽरूचिमत्वस्य, अवतारतारतम्यधर्मज्ञानवैराग्यादिसाधनादिरूचिमत्वस्य, निजसर्वोपर्युपासनायाश्च निरूपणम् कृतम्।

- त्रयोविंशोत्तरशततमे- जीवव्याप्यतत्वोनिषन्नामके

जीवो व्याप्नोति देहे निजमतिसृतितो ज्ञातृभावोऽर्क वच्च,
यादृक् दृष्टं स्वरूपं वदति स हि तथाऽभ्यस्त द्रष्टप्रकाशम्।
पिण्डब्रह्माण्डसाम्य भवति तरतमे दर्शनं चाऽक्षरान्तं,
सांख्ये योगे च तत्त्वान्यपिपरिगिणितान्येव जीवेशभेदा:।।
वेदान्ते ब्रह्म चोक्तं त्वधिपतिरभि चाहं परात्मापि चोक्त.,
निर्वैकल्प्याभिद्रष्ट्या निखिलमिदमथो ब्रह्म चैवास्त्युपास्यम्।
साकार्योपास्तिसत्कृस्ततमपरमपुं श्रीहरेर्मे।
शत्याढ्ये वै तरंगे शतकगणमिते स्पष्टमन्यत्तथाऽत्र।।

देवतेन्द्रियद्वारकजीवगतभोक्तृत्वस्य, हृषीकापेक्षाऽन्त:करणनैर्मल्यस्य, निरावरणदृष्टिमदात्मयथार्थदर्शन-तदन्याऽयथार्थदर्शनस्य गोपिकासमभक्तस्थमूर्तिमद्भगवत्कृतचितनिरोधार्थकाऽदृश्यभावस्य, कृपापात्रनिष्ठसजातीयतेजस्विजीवपुरूषाऽक्षरपरब्रह्मगोचर विशेषपृथग्दर्शनस्य, अक्षरपुरूषजीवादिगतमत्साकारशक्तिद्वारकमत्साकारनिवासस्य सांख्ययोगोपनिषत्साररूपसाकारपरमात्मोपासनस्य च निरूपणम्।

- चतुर्विंशोत्तरशततमे- निर्वासननिर्दोषोपनिषन्नामके

निर्मूलवासनाविधायकहेतवो निर्दोषत्वसाधनमथो गुणदोषलक्ष्म।
दम्भित्वमानविहतिर्हरिभक्तिरूर्ध्वा प्रोक्तात्र तुर्यसह विंशतियुक् शतेऽत्र।।

कुण्ठिताऽकुण्ठितनिर्मूलवासनालक्षणानां निर्मूलताकारतानां दोषमात्रनिवर्तकगुणमात्रप्रापकमहात्म्यसहितभक्तिभेदानां कपटमानादिदोषनाशकानां च निरूपणम्।

- पञ्चविंशोत्तरशततमे- सत्संगपतनाऽपतनोपनिषन्नामके

मायाया वैपरीत्यं ह्यतिकठिनतमे देशकाले सुधीत्वम्,
द्रोग्धादेहात्मवादी भवति हि विषयासक्तिमान् खण्डित स्यात्।
स्नेहध्वंसीति मायाविषयसुविमना निश्चये मे दृढो यो
विश्वासार्हो न मानीरितमिति शतयुक्पञ्चविंशे तरंगे।।

---

मायाबलस्य, मन्निश्चयिनो विपरीतमर्त्यभावस्य, देहाभिमानीनिनोऽवगुणग्राहकस्य, विषयासक्तस्य विमुखत्वस्य, उदासीनस्य विषयाऽरूचेः, एकान्तिकस्याऽचलतायाः सुमाहात्म्यविदो माननिवृत्तेः, माहात्म्यहीनस्याऽविश्वासस्य च प्रतिपादनम् कृतम्।

- षड्विंशोत्तरशततमे- अवतार्येकस्वरूपोपनिषन्नामके

सौदार्ढ्यं निश्चयांऽशेऽवतरितभगवन्मूर्त्युपास्तिर्न भिन्ना,
कार्यं तन्वा तु कृत्वा त्यजति तमुभय धाम्नि दिव्य. स एक.।
मूढानां मुग्धताऽत्र स्ववदिति न सता दिव्यमूर्तौ हरेस्तत्,
प्रोक्तं षड्विंशवीचौ शतकसमयुते भाववृद्धिस्तरंगे।।

प्रत्यक्षमानववेषश्रीहरिकृष्णभगवतो निजधामगतदिव्यस्वरूपैक्यस्य, विभिन्नवेषावतारमूलद्विभुजस्वरूपस्य--मानववेषभगवत्तद्भक्त तद्भवनादिदिव्यभावनावता, परिपूर्णभक्तत्वस्य च निरूपणम् कृतम्।

## ।।इति लोयानगरस्य 18 तरंगाः।।

# ।।अथ पञ्चालप्रकरणतरंगाः।।

- सप्तविंशोत्तरशततमे- भगवदलौकिकसुखोपनिषन्नामके

हरे. सुखविचारेण तुच्छान्यन्यसुखानि वै.।
सप्तविंशोत्तरशते वीचावुक्तं स्फुटं वच.।।

भगवत्सुखाधिक्यविचारजन्यमायिकसुखतुच्छतायाः, भगवत्सुखप्राप्तिसाधनवत्ताविधानतायाश्च वर्णनम् कृतम्।

- अष्टाविंशोत्तरशततमे- सांख्ययोगादितत्वसारोपनिषन्नामके

सांख्येयोगे तत्त्वतौल्यादि दोषे युक्ति: शिक्ष्या दोषनाशार्थयुक्ता।
ध्यातव्य: श्रीस्वामिनारायणोऽष्टा विंशत्याढ्ये वै शतांके समुक्तम्।।

श्रौतेसांख्येयोगे च जीवेश्वरमिथ्यात्वदूषणस्य कापिले सांख्ये निरीश्वरत्वस्य पातञ्जले योगे सर्वध्याने जीवेशाद्यंशांऽशिभावस्य च दूषणस्य दूरीकरणार्थं श्रीहरिप्रदर्शितश्रुतिप्रतिपाद्यजीवेश्वरपरमात्मनित्यत्वादिनिर्णयोत्तरतच्छास्त्रीय त्रुटीनाशार्थकपरमात्मस्वतन्त्रपरमपुरूषस्वीकारतद्ध्यानादिकरणस्य निजमतस्य प्रतिपादनम् कृतम्।

- एकोनत्रिंशोत्तरशततमे- स्नेहसेवोपनिषन्नामके

मानेर्ष्याकारणं धीररहितमिति निजं दोषजातीक्षणं न,
माया स्नेह: स मुक्ता स्थिरमति सुयुता स्नेहसेवा हरौ सा।
कार्या नैर्गुण्य भावाद् विरतिसहयुतात् देहभिन्नोऽहमात्मै,
कोनत्रिंशत्तरंगे शतसहमिलिते ज्ञानयुक्तं स्वशुद्ध्यै।।

मानेर्ष्यादिदोषनाशस्य, साधुगुणग्रहणस्य, निजाऽवगुणग्रहणस्य, अमौर्ख्यस्य इन्द्रियान्त:करणशत्र्वविश्वासस्य भगवति स्नेहभक्तिकरणस्य, भगवदतिरिक्तमार्गाऽगमनोपदेशस्य च दर्शनम् कृतम्।

- त्रिंशोत्तरशततमे- भगवद्दिव्यतोपनिषन्नामके

हरेर्दिव्यं रूपं न किमपि समं तेन कथितं,
मनुष्यो दिव्योऽयं युगतनुधरो वेषविषमः।
परश्रेयोहेतुर्ह्युभयविधकृन्निश्चय इति,
समुक्तं त्रिंशद्युक् शततम तरंगे तु हरिणा।।

भगवन्मूर्तौ भगवद्गुणादौ मायिकाकारादिगुणादि कृतोपमेयत्वाभावस्य, भगवद्धामतन्मुक्ततत्समृद्ध्यादिष्वपि मायिकस्थलतदीश्वर देवाद्युपमेयत्वाभावस्य, सर्वसामर्थ्यगुणविभूतिचमत्कारादिदिव्यतासम्पूर्णभगवत्प्राकट्येऽपि भक्तजनसुखार्थकतत्साजात्यापेक्ष निजसर्वगोपनपरायणप्राविर्भावमानवभावाऽभेदविज्ञानिभक्तजनकृतनिश्चये परिपक्वे संशयस्पर्शाऽभावस्य प्रतिपादनम् कृतम्।

- एकत्रिंशोत्तरशततमे- मानत्यागोपनिषन्नामके

भगवत्तत्प्रभक्ताग्रे श्रेष्ठा निर्मानितेहिता।
विमुखाग्रे तु नैकत्रिंशद्युक्शततरंगके।।

भगवत्तत्साधुजनाग्रे निर्मानित्वस्य विमुखाग्रे मानस्य च वर्तनस्य वार्ता।

- द्वात्रिंशोत्तरशततमे- श्रीपरपुरूषोत्तमोपनिषन्नामके

शास्त्रे दृष्ट्या प्रबुद्धोऽखिलविविधसुशक्त्याढ्य एवास्ति कृष्णो,
भावाः सर्वेऽत्र तस्याऽगणित तनुगता दर्शिताः स्वेन दिव्याः।
गोलोकेशश्च भूमापुरूष इति निजो वासुदेवः स्वयं च,
प्रोक्तो नारायणः श्रीनरसहित इति स्वो महाभारतादौ।।
सर्वोत्कृष्टोऽवतारः प्रभवति वासुदेवात्मजः सर्वशक्तिः,
सर्वैश्वर्याढ्य एवेत्यपि कुरूत मतिं श्रीहरौ धर्मपुत्रे।
नाऽऽदिश्रीकृष्णनारायण सुपरमंपुस्येव साक्षात्मयि द्वा,
त्रिंशाढ्ये वै तरंगे शतक उदित मस्यास्ति मोक्षो ध्रुवो यत्।।

लक्ष्मीनारायणभूमनारायणवैराजनारायणशेषनारायणादिप्राविर्भावादिदर्शनप्रदातु राधाकृष्णस्य पुरूषोत्तमस्य निजमूर्तौ दर्शनकारयितृत्वेन श्रीहरेः परमपुरूषोत्तमत्वमितिनिश्चितमतिकस्याऽन्य साधनमान्द्येऽप्यवश्यमात्यांतिकमोक्षणं स्याद् भवद्भिरपि तथाविधोपासना मम पुरूषोत्तमस्य कर्तव्येति श्रेष्ठोपासनाविवेचनम् कृतम्।

- त्रयस्त्रिंशोत्तरशततमे-आनन्दघनैकरसमूर्त्युपनिषन्नामके

मायानाम्ति प्रभो वै भवति परम मन् श्रीहरिर्धाम्नि चात्र,

मूढो मायादृशा तं निजमिवमनुते नेक्षते नाट्यलीलाम्।
मूर्तं द्रव्यं न चष्टे भवति हरिरथो दिव्यवेषोऽत्र धाम्नि,
मायात: पुंस्वरूपो जनयति जनता वीर्यधृक्पुंतनुस्थ.।।
तत्त्वात्मा यर्हि स स्थान्निजकिरणगणैस्तत्त्वलैन्यं विधत्ते,
मूर्तिर्भागाद्यनार्हा समरसविभवा मुक्तकोट्योऽपि तद्वत्।
दिव्या धाम्न्यत्र वै सा सुमतिसुपुरूषैर्ज्ञायिते ज्ञानिभक्तै.,
साकारोपास्ति युक्तैरिति शत उदिता वाक् त्रयस्त्रिंशंकाढ्ये।।

भगवत्पुरूषोत्तम स्वरूपे मायालेशरहितत्वस्य, सर्वावतारापेक्षया श्रीकृष्णभगवतोऽन्यावतारैश्वर्यादिप्रदर्शनहेतुकपुरूषोत्तमत्वस्य श्रेष्ठावतारत्वस्य, एकान्तिक भक्तानां मानवदिव्यवेषभगवन्मूर्तौ सर्वथा दिव्यभावनोपासना भक्त्यादिभवनस्य, अभक्तानां तु मोहार्थक प्राकृतमानवस्वरूपनाट्य दर्शनस्य मोहकरस्य वास्तविकब्रह्मलोकस्थाऽत्रत्यलोकस्थोभयविधश्रीहरिकृष्णभगवत्परपुरूषोत्तमैक दिव्यमूर्तिसत्त्वज्ञानस्यैवाऽभक्तियुक्तस्याऽत्यन्तिककल्याणप्रदत्वस्य, परिपक्वनिश्चयवतो धर्मादिमान्द्येऽपि परमनि:श्रेयस प्राप्तिध्रौव्यस्य च निरूपणम् कृतम्।

**।।इति पञ्चाल प्रकरणस्य तरंगा:।।**

---

# ।।अथदुर्गपुरीयमध्यप्रकरणतरंगाः।।

- चतुस्त्रिंशोत्तरशततमे-मोहनिवृत्युपनिषन्नामके

मोहो निवर्तत इतोह सहेतुकोक्तिध्रुवद्वयेक्षण समाधिगतिर्लयेक्षा।
ब्रह्मात्मभावहरिसौख्यमतिश्चतुस्त्रिंशोर्ध्वे शते
ह्युदितमाविषयेष्वसक्तिः।।

मोहस्वरूपस्य मोहोदयकारणविषयासक्तेरात्मनिष्ठावैराग्यमाहात्म्यज्ञानानां विषयासक्तिनाशद्वारामोहनिवर्तकत्वमितिप्रतिपादनम् कृतम्।

- पञ्चत्रिंशोत्तरशततमे- विषयविनिवृत्युपनिषन्नामके

बाह्यार्था यान्ति चाऽन्त. करण विषयसंसर्गतो नाशनीया,
आत्मज्ञप्त्याप्रवेशाद् बहिरिभिविषयाणां तथान्तर्विनाशान्।
कामादीनां जयो न व्रततप उपवासादिभिश्चेति पञ्च,
त्रिंशोर्ध्वे वै शते सन्निगदितमिति यत् साधुतोपार्जनीया।।

आत्यांतिककल्याणप्रदसाधुताया उपार्जनस्य बाह्यविषयनिरोधस्य आन्तरभगवन्मूर्तिधारणाध्यानाभ्यासेन आन्तरवासनाविषयविनाशस्य ब्रह्मात्मपूर्णसुखवत्वस्य विवेकविचारस्य कामादिजयस्य च विवेचनम् कृतम्।

- षट्त्रिंशोत्तरशततमे- रसिकमार्गमाहात्म्यज्ञानोपनिषन्नामके

आत्मज्ञानमपीह मोक्षकरणो मार्गो रसिकोऽपि वै,
भक्त्या स्यादथ मायिकै विकृतिजैर्भावैस्तु पातो महान्।
माहात्म्यं त्वतिपापकृद्वृषकरं चाऽपीति कार्य शुभम्,

---

षट्त्रिंशोर्ध्वशते तरंगक इदं प्रोक्तं स्फुटं धार्मिणा।।

दिव्यरसिक श्रृंगारमार्गस्य स्वामिसेवक भावान्वित ब्रह्मात्मज्ञानस्य च मुक्तिहेतुत्वस्य, मायिकरसिकविकारिमार्गस्य जीवभावापन्न ब्रह्मज्ञानस्य तु मोक्षपतनकारणत्वस्य वर्णनम् कृतम्।

- सप्तत्रिंशोत्तरशततमे- भक्तिधर्मान्यतरक्षोपनिषन्नामके

सद्धर्मभक्त्यन्तररक्षाऽन्यतरवैगमे।
हरेः प्रसन्नता यत्र रक्ष्यं चाऽथ परोक्षके।।
चिन्तनं श्रीहरेरूक्तं, धर्ममाहात्म्यसंयुजा।
भाव्यं श्रद्धालुना सप्तत्रिंशद्युक्शतकेरितम्।।

आपत्कालीनधर्मभक्त्यन्यतरत्यागप्रसंगे भगवत्प्रसन्नताविषयतदन्यतररक्षणस्य, महापन्काले तु केवलश्रीहरिचिन्तनविधानस्य तत्र च श्रद्धामहात्म्यज्ञानप्रयोजकत्वस्य निरूपणम् कृतं।

- अष्टत्रिंशोत्तरशततमे- पातिव्रत्यशौर्यपक्षोपनिषन्नामके

पातिव्रत्यं च शौर्यं निगदितमिति वै भक्तपक्षस्थितत्वम्।
पक्षो नो रक्ष्य उच्छृंखलविमुखजनस्येति धार्म्युक्तमत्र।
साधुत्वं शास्त्रदृष्ट्या स्थितिरिति कथितं श्रीहरेर्भक्तपक्षे,
चाऽष्टत्रिंशत्सुयुक्ते शततमकतरंगेऽत्र धर्मात्मजेन।।

पातिव्रत्यशूरवीरत्व सत्संगपक्षवर्तित्वविधानम् कृतम्।

- एकोनचत्वारिंशोत्तरशततमे- विधिनिषेधसत्यत्वोपनिषन्नामके

सत्यौविधिनिषेधौ हुण्डिकापत्रे धनादिवत्।
तदसद्वादिनां नास्तिकत्वं नरकपातिता।।
चित्तं बहुस्वभावं वै जेयं द्रष्टा विवेकतः।
प्रोक्तमेकोनचत्वारिंशद्युक्तशतवीचिके।।

विधिनिषेधसत्यत्वस्य चिक्कणचित्तवृत्तिस्वभावस्य तन्निरोधोपायस्य च प्रदर्शनम् कृतम्।

- चत्वारिंशोत्तरशततमे- एकादशीव्रतयज्ञोपनिषन्नामके

एकादशीव्रतकथा व्रतयज्ञरूपा ज्ञानाध्वरश्च करणीयतयोपदिष्ट ।

हर्यंशता भवति भक्तजनेषु चत्वारिंशाकयुक्शततमांकित वीचिवर्ण्यम्।।

एकादशीव्रतस्य योगयज्ञज्ञानयज्ञादिनिष्कर्षस्य . श्रीहरिसाक्षात्काराऽवधिकस्य द्रव्ययज्ञवैविध्यस्य च निरूपणम् कृतमस्ति।

- एकचत्वारिंशोत्तरशततमे- विकारनाशकोपनिषन्नामके

दुष्टस्वभावस्थितिकारणं खलु वैराग्यमान्द्यं च विकारमण्डलम्।
निवर्तते साधुजनप्रसेवया हरे. कृपातोऽपि विकारनाशनम्।।
एतद्विभिन्नै: कृतसाधनैस्तु विकारनाशो हि चिरेण तु स्यात्।
प्रोक्तं तरंगे स्फुटमेकचत्वारिंशाधिके वै शतकेऽत्र सम्यक्।।

दु:स्वभावानिवर्तनेवैराग्यमान्द्यस्य शीघ्रंदुष्टस्वभावनिवर्तने साधुसेवाया अनुवृत्तोभगवत. कृपायाश्च हेतुत्वम्, ज्ञानतप:प्रभृतीनां तु विकारनिवर्तने चिरकालेन सहकृतेन हेतुत्वं जन्मान्तरेण वा हेतुत्वं चोपपादितम्।

- द्वाचत्वारिंशोत्तरशततमे- भगवत्स्वरूपवलोपनिषन्नामके

स्वरूपस्य द्रोह: क्वचिदपि न कर्तव्य इति मे
बलं मूर्ते. रक्ष्यं त्वनिशमपि मत्स्नेहकरणम्।
न चेत्पक्वानिष्ठामयि स मम धामान्य गतिकृत्
ममैकान्तो भक्तश्चलितवृषतश्चापि विमल:।।
भवेत्कल्याणस्थो मम महिमधीप्रीतिसहित:,
स्वरूपे मे निष्ठाविरहितजनो याति नरकान्।
इति द्वाचत्वारिंशदधिकयुते वीचिशतके
स्फुटं प्रोक्तं प्रीतीतरदिह न कर्तव्यमयते।।

भगवत्स्वरूपबलनिष्ठाया धर्मनिष्ठापेक्षयाऽत्युत्कृष्टत्वेनाऽशुभदेशादौ धर्ममान्द्येऽपि स्वरूपनिष्ठावतो भवेद्भगवदतिशयप्रीत्या मोक्ष:, केवलधर्मनिष्ठावतस्तु देशादिनिकृष्टत्वे धर्मविगमे शोकेन स्यात्पतनमितिप्रतिपादितम्।

- त्रिचत्वारिंशोत्तरशततमे- साकारप्रतिपत्युपनिषन्नामके

हरि: साकार· स्वो भवति निजतेजोऽक्षरपदम्,
निराकारं व्याप्तं मतमिति न शास्त्रात्तु लभते।
विरागज्ञानप्रीतिमयपरभक्त्यंक कथनम्,
त्रिचत्वारिंशोर्ध्वे शततमतरंगेऽत्र विहितम्।।

---

भागवतादिभ्य. साकारस्वरूपोपासनायाः भगवत्प्रीतिजनकानां ज्ञानवैराग्यभक्तीनां भक्तेरूत्कृष्टजनकतायाः भगवतो लौकिक चरित्रादावपि निर्लेपतादि बोधवत्तायाः लक्ष्म्या इव स्नेहसंभृतसेवायाः गोपीनामिवपरमप्रेमास्पदतायाश्चविधानम् कृतम्।

- चतुश्चत्वारिंशोत्तरशततमे- निष्कामकर्मभक्त्यपुपनिषन्नामके

धमार्थकामप्रफलं स्वरादि चेद् भक्तिरूपं फलमस्यमुक्ति ।
नैष्कर्म्य-सेवाऽत्र चतुःप्रचत्वारिंशाऽधियुग्वीचिशते तदुक्तम्।।

स्वर्गादिभोगफलदानपरकधमार्थकामानां यदि भक्तौ समुच्चयेन मोक्षपरकताक्रियेत तदा मोक्षप्रदभगवदर्थनैष्कर्म्यत्वं तदनुष्ठातुः परमभक्तत्वं मोक्षप्राप्तकत्वं स्यादितिनिरूपितम्।

- पञ्चचत्वारिंशोत्तरशततमे- कल्याणराजनीत्युपनिषन्नामके

हृषीकप्राणान्तः करणवशकृज्जीवनृपतिः,
मदीयं माहात्म्यं निरवधिकमाज्ञाय मम यः।
भवेद् ध्याता स स्यात् परपदमाप्तः सशतप
-ञ्चाचत्वारिंशांके गदितमु तरंगेऽत्र हरिणा।।

माहात्म्यज्ञानसहितपुरूषकारात्मकस्य परमकल्याणसाधनस्य आत्माऽनात्मविवेकद्वारकदोषप्रकृतिभ्रमनिरासस्य, साधुद्वारकबलिष्ठराजनीत्यभ्यासस्य, भगवद् ध्यानस्य च प्रतिपादनम् कृतम्।

- षट्चत्वारिंशोत्तरशततमे- साक्षात्परब्रह्मनिरूपणोपनिषन्नामके

ना सक्तिर्विषयेषु, सर्वसमता, ज्ञानस्य भारो न मे,
प्रत्यावर्तनमेव वृत्तिसरणे, स्वात्मस्थ तेजोघने।
मूतिर्भागवती सुदृश्यत इयं कैशोररूपोज्ज्वला,
वीक्षे तामपरं न, तद्विधजनस्याऽऽसत्तिनाशो भवेत्।।
तेजस्यक्षरधामनि स्थितपरब्रह्माऽस्म्यहं, मुक्तये,
जीवानां त्विह चागतोऽस्मि पुरूषश्रेष्ठो मनुष्याकृतिः।
दिव्योऽहं, मम संगि सर्वमपि यद् दिव्यं, स्थलं वाहनम्,
वस्त्रालंकरणाऽशनाद्यनुचराः सर्वं तु वै निर्गुणम्।।
वर्तेऽहं निखिलावतारजनकः सर्वाऽवतार्यस्म्यहम्,
ज्ञात्वा साधुजनात्प्रपूर्णमिति यत् कल्याणमार्गे स्थितिः।।

---

स्नेह: स्यान्मयि वार्तयेयमनिशं रक्ष्या सबीजेति षट्,
चत्वारिंशयुते शते वचसि संप्रोक्ता स्वबोधार्थिनी।।

साहजिकसमदृष्टिगुणाऽभारप्रतिलोमत्वात्मतेजोमध्यमूर्तिदर्शनाऽनासक्ति श्रीहरिनिजप्राकट्यस्वसम्बन्धिपदार्थदिव्यत्व साधुद्वारक सर्वोपरिज्ञानप्राप्त्येतज्ज्ञातृगतकल्याणाऽविघ्ननिजीयपरपुरूषोत्तमत्वप्रत्यक्षोपासनत्वादिबीजविधानत्वादिविवेचनम् कृतम्।

- सप्तचत्वारिशोत्तरशततमे- भगवत्तदात्मकत्वोपनिषन्नामके

हरे: स्वरूपे सुनदात्मकत्वं स्वरूपबोधादपि निर्गुणत्वम्।
भवेच्छतोर्ध्वेऽत्र तु सप्तचत्वारिंशे तरंगे विशदं समुक्तम्।।

साधुसमागमलभ्यसाक्षाच्छ्रीहरिधामस्थ श्रीहरिमूर्तिस्वरूपैक्यसर्वोपरिविलक्षणनिर्विकल्पकसमाधिरूपतादात्म्यदृढदिव्य निश्चययुङ्निर्गुणस्थिति कर्तव्यतेति विधानम् कृतम्।

- अष्टचत्वारिंशोत्तरशततमे- दुर्गुणहरविचारोपनिषन्नामके

दुष्टस्वभावनशनेऽरि विचार उक्तो धर्मादितो न पतनं खलु यत्स्वभावात्।
प्रोक्त: स्वभाव इतिस: शतकेऽष्टचत्वारिंशाधिके वचसि वै हरिणा स्फुटोऽत्र।।

दुष्टस्वभावानां शत्रुभावनया विनाशस्य, तेजस्विनो धर्मादिपतनाऽप्रसंगस्य च विवेचनम् कृतम्।

- एकोनपञ्चाशदधिकशततमे- स्वरूपधर्मनिष्ठोपनिषन्नामके

स्वरूपनिष्ठा ह्यति धर्मनिष्ठा, निरोधवृत्यर्थजयोदमश्च।
श्रद्धा विरागोऽत्र नवाधिचत्वारिंशद्युते वै शतके समुक्ता:।।

श्रद्धातिशयेन नियमितेन्द्रियनिरोधकृतविषयजयस्य, द्रुततरसंसिद्धस्य द्रुत मोक्षगते:, मन्दस्य चिरेण फलप्राप्तेश्च निरूपणम् कृतम्।

- पञ्चाशदधिकशततमे- स्वरूपतत्वोपनिषन्नामके

सुदिव्यतत्त्वैकरसा हरेस्तनूर्न सांख्यशुष्कश्रुतितत्त्वसम्मता।
आनन्दमात्रैकरसात्मसद्गुणा किशोरमूर्तिर्व्यतिरेकत स्थिता।।
ब्रह्माख्यमुक्तैरभिसेपिताऽक्षरे समग्रतत्त्वेष्वभिसंस्थितान्विता।

---

फलप्रदाऽन्तर्यमिनी च साक्षिणी शतोर्ध्वपञ्चाशदुपासनेरिता।।

आनन्दघनकिशोरमूर्तिध्याननिर्देशकस्य मायिकतत्ववर्जितस्य निर्लेपस्वरूपस्य श्रींहरेर्ज्ञातु:स्थितप्रज्ञनिर्विकल्पकसमाधिमतो मुक्ततायाश्च निरूपणम् वर्द्धते।

- एकपञ्चाशदधिकशततमे- कुसंगिसंगत्यागोपनिषन्नामके

नास्तिका: शुष्कवेदान्ता: कुसंगद्धयमीरितम्।
न कार्यं तत् त्वेकपञ्चाशद्युक्शते समीरितम्।।

नास्तिकशुष्कवेदान्तिसंगाऽकरणस्य, साकारसगुणदिव्यभगवन्मूर्त्युपासकसाधुसंगकरणस्य च प्रतिपादनम् कृतम्।

- द्विपञ्चाशदधिकशततमे- साकारोपास्तिपत्रोपनिषन्नामके

ब्रह्मज्ञानि प्रशुष्कास्तनुरहितहरिं प्राहुरेतत् तु मा स्यात्,
साकारोपास्तिपत्रं त्वलिखदिति हरि: सर्वदेशस्य शिष्यान्।
दिव्यामूर्तिह्युपास्या मम वचनमिदं भक्तियुक्तं प्रमान्यम्,
द्वापञ्चाशद्युते वै वचसि शततमे स्पष्टमाह प्रभु: स:।।

शुष्कवेदान्तिमतनिरासरामानुजीयसाकारमतरूचिप्रदर्शनदिव्यसाकाराऽवतारिनिजभक्त्युपासनादिगर्भितपत्रोपदेशादिबोधनं कृतम्।

- त्रिपञ्चाशदधिकशततमे- ज्ञप्तिवृद्धिसिद्धदशोपनिषन्नामके

समाधिनिष्ठस्य सुबोधशक्ति: प्रवर्धते सिद्धदशा न तस्य।
निवृत्तिमान् सिद्धदशां स यातीत्युक्तं त्रिपञ्चाशदध: शतेऽत्र।।

समाधिमात्रज ज्ञानस्य वृद्धेरिन्द्रियादिशक्त्यवृद्धे. तपोवैराग्यादिजन्येन्द्रियादिशक्तिवृद्धे, संयमस्थित्युत्कृष्टतायाश्च वर्णनम्।

- चतु:पञ्चाशदधिकशततमे- स्वाप्नसृष्टिसत्यत्वोपनिषन्नामके

कर्तास्त्येको हरिर्वै भवति हरिचरित्रादि गानादि साक्षाच्छ्रेय कृत्,
सन्महित्वं निज निजकृतिजा कण्ठजा स्वाप्नसृष्टि ।
प्राधान्यं कालकर्मादिजमपि भवति श्रीहरिष्टं चलु:,
पञ्चाशद्युक्ते शते प्रोदितमिति विशदं स्वामिनारायणेन।।

प्रत्यक्षभगवत्तत्साधुजनमहात्म्यज्ञानवत आत्यान्तिककल्याणध्रौव्यस्य, कर्मसंस्कारभावनावासनाधर्माऽधर्मस्फुर्तिसूक्ष्म तन्मात्रादिबीजमयीमायाविचारादिव्यूहोपादानकस्वाप्नसृष्टेः हरिणा जन्यत्वस्य च स्फुटविवेचनम् कृतम्।

- पञ्चपञ्चाशदधिकशततमे- शूरभक्तविरत्युपनिषन्नामके

सैन्यद्वयस्य नहि मृत्युभयं मृधेऽस्ति,
भीतिर्न शूरबलिभक्तजनस्य तद्वत्।
निर्लोभिताऽपि च सतसमिह पञ्चपञ्चा
शोर्ध्वे शते निगदिताऽतिसमर्थता च।।

शूरवीरकातरभक्तलक्षणनिजव्याजप्रदिष्टभक्तप्रवृत्तिनिवृत्तिसमनुसन्धानभक्तनिष्ठदेवादिदस्मृद्ध्यलुब्धत्वनिजैकान्तिकभक्त भगवत्समाहात्म्यादिकं निरूपितम्।

- षट्पञ्चाशदधिकशततमे- जीवकिरणमानसोपनिषन्नामके

मनः स्वरूपं किरणं निजात्मनो हिमं च तप्तं च्यवते प्रमोक्षणान्।
हरौ प्रसक्तं तु सतां भवेद्धि षट्पञ्चाशदूर्ध्वे शतकेऽत्र वर्णितम्।।

शीतोष्ठाविषयस्पर्शिमानसयोगजन्यसुखदुःखाऽपराभूतोत्तमसाधुत्वप्रदर्शनम् कृतम्।
सप्तपञ्चाशदधिकशततमे- सांख्ययोगनिष्ठोपनिषन्नामके

सांख्ययोगबलिवृत्तिरविघ्ना श्रीहरौ भवति भक्तिरचाल्या।
प्रतियुक्तिरपि सप्तसुपञ्चाशत्तमे समुदिता सुविरागा।।

समाहात्म्यज्ञानसांख्यनिष्ठायोगनिष्ठावतो निर्विघ्नतापूर्वकभगवद्धामप्राप्तिस्थितिरिति वेदनम् प्रतिपादितम्।

- अष्टपञ्चाशदधिकशततमे- निर्वासनिकत्यागिगृह्युपनिषन्नामके

निर्वासिनो हि लभतेऽक्षरधामवास, सत्सेवनाद्भवति वासनिकत्वनाशः।
राज्येऽपि साधुनिकटै त्वतिदीनभावे, भक्ते प्रसीदति हरिर्हिसमुक्तमत्र।।
अन्यथा धामलाभो न त्यागिनो गृहिणोऽपि च।
अष्टपञ्चाशत्समूर्ध्वे शतेऽत्र वचनामृते।।

निर्वासनस्य मोक्षणसत्सेवयावासनानाशः साध्वग्रे दीनाऽधीनभावोभगवत्प्रसन्न्ता चोपपादिताः।

---

- नवपञ्चाशदधिकपञ्चाशततमे- दु:स्वभाव त्यागोपनिषन्नामके

विरोध्येव त्यक्ता भगवद्रूचिस्थं स तु चरेत्,
मदीयां सद्भक्तिं गुणसमवदानं च हितकृत्।
भवेन्मत्सेवाढ्य: पुरूसुहितशिक्षा ग्रहणकृत्,
शते प्रोक्तं पञ्चाशदनुगनवाढ्येऽमृतपदे।।

भगवत्तत्साधुजनाऽरूचिकरस्वभावत्यागतद्गुणग्रहणभक्तत्वतदवगुणग्रहणाऽर्धविमुखत्व - भक्त्यन्तरायकृद्धर्मादिपरिष्करण दोषग्राहिपतन - गुणग्राहिसत्संगभक्तिवर्धन शिक्षाग्राहिनिष्ठगुरूप्रभृतिप्रेमातिशयादि विवेचितम्।

- षष्ट्योत्तरशततमे- भक्त्युपास्तिप्रवर्तनोपनिषन्नामके

क्रोधस्यापि निमित्तमुक्तमु विचारस्यापि चोक्तं बलम्,
माहात्म्यस्य बलेन पूर्वभवसंस्कारैश्च निर्बन्धनम्।
देशाद्यष्टबलं च साधुपुरूषप्रीतिप्रसादाऽर्जनम्,
दु:संकल्पनिरासदीन करूणावस्तु प्रदानादिकम्।।

रोषदूरीकरणपूर्वसंस्कारबलगुणातीतविचारदेशादिबलमलिनसंकल्पत्यागमहापुरूषप्रसाददीनरञ्जन भावत्यागदयापक्षमान्द्य मन्दिरमूर्तिभक्त्युपासनापक्षमूर्धन्यभावादिप्रतिपादनम् कृतम्।

- एकषष्ट्योत्तर शततमे- भगवत्प्रकृतिसारोपनिषन्नामके,

गुरोश्च शिष्यस्य विभिन्न भावना हरेर्विभिन्ना प्रकृति· समीरिता।
फलं हरे: सेवनजं परं शुभं ह्यतुष्टिकारस्य फलं त्वनिष्टकृत्।।
सेवाप्रसादार्जन धामलब्धिद्रोहाद्यतुष्ट्यर्जनलोकपात:।
प्रोक्त: शते वीचिवरैक षष्ट्यन्वितेऽत्र धर्मत्मजभक्तिजेन।।

वासुदेवमाहात्म्य श्रैष्ठ्यसपरीक्षण- दयालुत्वभगवद्भक्तत्वसद्गुणग्राहित्वसाधुसेवनशुभफलकत्वसाधुद्रोहाऽशुभफलकत्वगुण ग्राहिसेवकगताऽक्षरधामवासवत्वसेवामुख्यत्वादिप्रतिपादनम् कृतम्।

- द्वाषष्ट्योत्तरशततमे- भगवदासक्त्युपनिषन्नामके

हरिस्वरूपाऽत्यति सक्त चित्त लक्ष्माणि सत्सेवनयाऽतिसक्ति:।
द्वाषष्टियुक्ते शतके तरंगे प्रोक्तानि वै श्रीहरिणा स्फुटानि।।

---

प्राग्जन्मीयबलिष्ठशुभसंस्कारै तज्जन्मीयमहासत्पुरूषसेवाप्रसन्नताऽन्यतरलभ्यभगवत्स्वरूपाऽतिशयासक्तिवर्णनं कृतम्।

- त्रिषष्ट्योत्तरशततमे- कलिनिवासपरिहारोपनिषन्नामके

काञ्चने कलिनिवास उदुक्त: सुन्दरीतनुवरे कलिवास:।
बन्धनं तदुभयं न तु भक्ते त्रीतष्टिशतकेऽत्र तदुक्तम्।।

कलिनिवासभूतस्त्रीसुवर्णबन्धनं निजस्वरूपशुद्धब्रह्मचैतन्यविज्ञस्य भक्तस्य न स्यादिति प्रोक्तम्।

- चतु:षष्ट्योत्तरशततमे- सृष्ट्यवतारोपनिषन्नामके

व्यष्टिसृष्टिसहितो हरिरन्तर्निवासितविराडावतारा:।
भिन्नचेतनचतुष्ट्यमुक्तं वै चतुर्युतसषष्टिशतेऽत्र।।

परब्रह्मश्रीर्ह्यन्वितब्रह्मान्वितमहापुरूषद्वारा महामायात प्रधानपुरूषमहत्तत्त्वादितत्त्ववैराजतत्सृष्ट्यादिजननस्यभगवदन्वित वैराजद्वाकाऽवतारसंभवस्य, परब्रह्मण: श्रीहरेरूपास्त्याजीवेश्वराणां मोक्षस्य, महापुरूषनिर्लेपत्वस्य, वैराजस्य व्यूहोपासनालभ्य स्वकार्यसामर्थ्यस्य, वैराजस्य स्वकार्यालये स्वपित्राश्रयस्य परपुरूषोत्तमस्य सर्वथोपास्यत्वस्य चोपवर्णनम् कृतम्।

- पञ्चषष्ट्योत्तरशततमे- कुटुम्ब्यसंसृष्टभक्त्युपनिषन्नामके

कुटुम्बिसम्बन्धमगाधमाहुस्तदुज्झने भक्तित एव मुक्ति.।
अनिष्टदेशादिकवर्णनं च प्रोक्तं शते पञ्चगषष्टियुक्ते।।

सम्बन्धिकुटुम्बिमायिकस्नेहत्यागमुक्तिकारणभक्तिमात्रसाहाय्यकविघ्नहरधर्मादित्रय-शुभदेशादिसेवनवर्णनविधानवर्णनं कृतम्।

- षट्षष्ट्योत्तरशततमे- शीलब्रतदाढ्यौपनिषन्नामके

श्रीहर्यंगसमस्थिति: प्रगदिता दिव्या च दोषोज्झिता,
भक्तप्रेमहति: स्थितिक्षतिकरी निष्कामिता सद्रूचि:।
द्रष्टांतेन सुशील हेतुनिकर: प्राणो मनो जिव्हिका,
जेतव्या नियमै: शते निगदिता. षट्षष्टियुक्ते ध्वनौ।।

---

श्रीहरिर्निष्ठमायिकविषयाऽप्रीतिमत्तादृढब्रह्मचर्यव्रतरूचिमत्तातदर्थमनोवश्यत्वप्राणनियम नपाल्यनियमवर्तनाऽनुष्ठानादिप्रतिपादनं कृतम्।

- सप्तषष्ट्योत्तरशततमे- मायिकतत्वनिर्जीवजडत्वोपनिषन्नामके

जडानि तत्वानि हि मायिकानि सुरास्तदीया: खलु चेतना वै।
न कार्यरूपाणि तु जीववन्ति शतेऽत्र सप्ताधिकषष्टियुक्ते।।

मायिकजडमहत्तत्त्वादि कारणात्मकसमष्टितत्त्वानां सेश्वरचेतनत्वेऽपि कार्यात्मकानां देहस्थानां तु स्वीयस्वरूपे निर्जीवत्वस्य देहे एकजीववत्त्वस्य च प्रतिपादनम् कृतम्।

- अष्टषष्ट्योत्तरशततमे- आत्मदर्शनोपास्त्युपनिषन्नामके

आत्मदर्शनकरं हरिमूर्तेर्ध्यानमेव नियमस्थितिरूक्ता।
मानसस्य नहि विश्वसनं वै प्रोत्सवस्मृतिरूमोक्षकरीति।।

आत्मदर्शनमात्रस्य परममुक्त्यप्रयोजकस्य मूर्तिध्यानलीलास्मरणनामभजनधर्मानुष्ठानानां परममोक्षप्रदत्वस्य केवलधर्मनिष्ठस्वर्गादिप्रदत्वस्य साकारोपासनाप्रवर्तकशास्त्रपरिशीलनस्य च प्रतिपादनं कृतम्।

- एकोनसप्तत्योत्तरशततमे- मूर्तिसततवृत्युपनिषन्नामके

मूर्तौ हरेवृत्तिरखण्डिता स्याच्चित्तस्य सक्तिर्हृदि शूरता च।
जन्मादिभीतिश्च विरागिता च चतुर्विधं कारणमुक्तमत्र।।
स्नेहो हि माया विषये कुटुम्बे तन्नाशने श्रीहरिवृत्तिसक्ति:।
कृतार्थतैकोन सुसप्तनिघ्ने शते तरंगे कथितं स्फुटं तत्।।

स्निग्धत्वशूरत्वभयवत्त्वविरागत्वकृपात्मकसाधनजन्यभगवद्खण्डवृत्ति: निवेचिता:।

- सप्तत्योत्रशततमे- स्वाभाविक प्रकृतिनाशोपनिषन्नामके

स्वाभाविक्या: प्रकृतेर्नाशने गुर्वनुवृत्तिका।
हेतु: सप्तत्यधिके वै शते वीचाबुदीरित.।।

स्वाभाविकप्रकृतिनाशे साधुवचनार्थवर्तनसाधनताया: प्रतिपादनम् कृतम्।

- एकसप्तत्योत्तरशततमे- भगवत्स्नेहप्रवेशोपनिषन्नामके

---

संसारिणां यन्त्रसुमन्त्रनाटके प्रतीतिरस्त्येव न भक्तिशालिनाम्।
स्नेहेन चोक्तं तु हरौ प्रवेशनं, शतैकसप्तत्यभिधे तरंगके।।

अभक्तगतलौकिकपदार्थपदप्रतीतिमत्तायाः, भक्तस्य भगवन्मात्रप्रतीतिमत्ताया एकान्तिकस्य भगवन्मूर्तौ सनेहप्रवेशवत्ताया. प्रतिपादनम् कृतम्।

- द्वासप्तत्योत्तरशततमे- नैसर्गिकगुणरहस्योपनिषन्नामके

देशाद्यप्रतिघातितस्वगुणिता प्रोक्ता हरे. सद्गुणा,
शीलं जीवनमेव सर्वगुणकृत् भक्त्या महत्वेक्षया।
श्रीमद्भागवते तु पञ्चमदशकस्कन्धोक्तया मोक्षणं,
तद्द्वासप्ततियुक् शते निगदितं मूर्तं स्वरूपं हरे ।।

- त्रिसप्तत्योत्तरशततमे- द्रोहनिवारक दण्डवदूपनिषन्नामके

त्रिसप्तत्याढ्ये वै शततमवचस्युक्तमधिकं,
कृतं द्रोहक्षेपाऽर्थक नतियुतं दण्डवदिति।
प्रभाते पूजायां नियमविधिरेषोऽस्ति कथितः,
शुभं सेवाजन्यं दुरितमिह राषादिजनितम्।।

भगवत्तद्भक्तसाधुजनादिगोचरद्रोहाऽपराधतद्धेतुलोभादिदोषनिवारणार्थकाऽधिकदण्डवत्प्रणामादिविधानसाधुसेवाविधानादिकस्य प्रतिपादनं कृतम्।

- चतुः सप्तत्योत्तरशततमे- सेवाभाग्योपनिषन्नामके

सेवाभाग्यं महत्प्रोक्तं चतुः सप्ततियुक्शते।
मोक्षक्न्मानरहितं भक्तियुग् गौरवप्रदम्।।

भगवत्तत्साधुजनसेवाविधाननिर्मानिस्वभावविधानभगवत्तत्साधुजनप्रसन्नतालभ्यमोक्षफलदर्शनादिनिरूपणं कृतम्।

- पञ्चसप्तत्योत्तरशततमे- अवतारोपनिषन्नामके

द्वैविध्यं भवतीति मेऽक्षरपदे सूक्ष्मं महीयस्तथा,
मूर्तिर्यत्र तदीयमध्यमपदं प्राविर्भवत्यत्रतः।
रोम्ण्येवाऽस्थ वसन्ति सर्वत इमा ब्रह्माण्डसंसृष्टय.,
प्रोक्तं पञ्चगसप्ततीतशतके बीचौ तदत्राऽक्षरे।।

---

भगवद्धाम्नः सूक्ष्मत्वमहत्वयोः श्रीहरावुपचारस्य धामकिरणरोमांशस्थाऽसंख्य ब्रह्माण्डोड्डयनस्य, धामस्थश्रीहरेरेव ब्रह्माण्डान्तर्गत मानवसमवेषावतारस्य बहुभवनशक्तिमत्वस्यप्रतिपादनम् कृतम्।

- षट्सप्तत्योत्तरशततमे- ब्रह्मस्वरूपप्रीत्युपनिषन्नामके

गुणातीतस्वरूपेणाऽऽत्मना प्रीतिः परमात्मनि।
ब्रह्मरूपा हि षट्सप्तत्यूर्ध्वे शते समीरिता।।

मायागुण विरहितभक्तस्याऽपि सर्वाऽऽचार्यसम्मतभक्तिप्रीतिमत्वं, श्रीहरौ ब्रह्मसजातीय प्रेमवत्वमितिविवृतिप्रतिपादनम् कृतम्।

- सप्तसप्तत्योत्तरशततमे- परदोषाऽदर्शित्वोपनिषन्नामके

परस्थदोषादिविलोकनी धीर्न दैवभावाऽथ सतां प्रसंगी।
स्वदोषवित्साधुरू सप्तसप्तत्यायुक्शते प्रोक्तमथापि सम्यक्।।

दैविभक्तजीवानां परगतगुणग्राहित्वस्वगताऽवगुणदर्शित्वस्य, आसुरिजीवानां स्वगुणग्राहित्वपरावगुणगाहित्वस्य स्वभावप्रदर्शकस्य सत्संगविधानगुणग्रहणविधानेत्यादिकं विवेचितम्।

- अष्टसप्तत्योत्तरशततमे- न्यूनतानिरासोपदेशोपनिषन्नामके

न्यूनत्वं नाशनीयं मम शरणिजने वासना क्षालनीया,
हेतूनां भिन्नभावाद् भवति विविधता कर्मसु प्रार्जितेषु।
कर्तव्यं सत्प्रसादप्रदहरिकरूणाकारि कर्माऽष्टसप्त,
त्यूर्ध्वे वीचौ शते संगदितमु विशदं सूर्यद्रष्टान्तयुक्त्या।।

न्यूनताक्षयवासनानाशसाधुभगवत्प्रसन्नताप्रदकर्मकृतिसेवाप्रसादसुखकारित्वादि प्रदर्शनम् कृतम्।

- नवसप्तत्योत्तरशततमे- भक्तधर्मोपनिषन्नामके

सतां विषादो नहि हर्षणं च हरेस्तु मार्गाच्च्यवने विषादः।
एकान्तिकानां वृषपुष्टये संभवन्ति लोकेऽत्र सदाऽवताराः।।
अभावनाग्रस्त उ नैव याति धामाक्षरं याति गुणाऽवलोकी।
कर्मानुरूपाप्तिरिदं नवाढ्यसप्तत्युदग्रे शतके समुक्तम्।।

---

साधुजनानां मायिकपदार्थे नष्टे न शोको व लाभेन हर्ष:, भगवदवतारप्राकट्ये भागवतधर्मपोषणप्रयोजनं, भक्तानां स्वैकान्तिकधर्मक्षतिरेव पारिभाषिकं मरणं, भगवत्तत्साधुगुणग्राहित्वे महापापादिनाशो दोषग्राहित्वे सर्वपुण्यनाशश्चेति विवेचितम्।

- अशीत्योत्तरशततमे- साधुरक्षाऽऽसक्तिवारणोपनिषन्नामके

सतां सुरक्षा गुरूभि: प्रकार्या, सेवा सतां दिव्यसभा च बाध्या।
कार्यस्तथा वासनिकाक्षयश्च, प्रोक्तं त्वशीतितशते तरंगे।।

साधुसंरक्षणोपदेशप्रसादीभवननि:स्पृहवर्तनसाधुसभादिव्यभाववासनाविनशन- ब्रह्मधामगमन- साधुगृहस्थान्मोन्य प्रसेवनादिनिरूपणम् कृतम्।

- एकाशीत्योत्तरशततमे- श्रीहरिजन्मधारणोपनिषन्नामके

मच्चिन्तामग्नमुक्तो नहि निवसति वै गर्भवासे पुन: स:,
कर्तव्यं नाऽस्य चास्ते परमनन परस्याऽस्ति संसारदु:खम्।
संग: कार्य: सतां वै कृतिमननवचोभिर्भवित्तेन मोक्षो,
जन्मप्राप्तौ निमित्तं हरिरपि घटयन् वर्तते भक्तमध्ये।।
मद्भक्तस्येह माता जनक इह भ्मतौ वै कृतार्थौ तु मुक्तौ,
अन्य ध्याता प्रमादी पतितजनिमृति प्राप्त एवास्ति मुग्ध.।
कार्यो मत्साधुसंगो मम सततमथो दर्शनं दुर्लभं यत्,
एकाशीत्यन्विते वै शततमवचने प्रोक्तमैकान्तिकत्वम्।।

सततभगवन्मूर्तिचिन्तनतदर्थसाधुसमागमसाधुमध्यप्राकट्यभक्तस्निग्धकुलोद्धारभगवत्समागमकरण- भगवच्चिन्तकैकान्तिक भक्तत्वादिविवेचितम्।

- द्वयशीत्योत्तरशततमे- दिव्यादिव्यभेदोपनिषन्नामके

हरेर्मूर्तौ भेदो भवति खलु मायोत्थकृतिनो,
हरिं मायाजन्यं वदति यमलोके स गतिकृत्।
हरिं दिव्यं जानन्मपरमपदभाग् भक्तिरसिको,
द्वयशीत्याप्ते वीचौ शततम उदीरितममृते।।

ब्रह्मलोकस्थस्य भूमिस्थस्य च परब्रह्मणो दिव्यमूर्तित्वस्यैक्यस्य च प्रतिपादनम् कृतम्।

- त्र्यशीत्योत्तरशततमे- परब्रह्मार्पणरहस्योपनिषन्नामके

भूत्वा ब्रह्मसुरूपिभिर्निजचिति प्रोद्भाव्यता वै मयि,

---

ब्रह्मस्थे पुरूषोत्तमे रसभरा प्रीतिर्ममाऽऽप्तिप्रदा।
मोहग्रन्थिरूदस्यतां भयमथो मायाकृकालं कृतम्,
भूयन्तां हृसवासनैस्त्रियुगशीत्यंके शते चेरितम्।।

ब्रह्मतेजसि निजात्मतादात्म्यभावनाभगवत्यखण्डप्रीतिमत्ताजगत्स्फूर्तित्यागकालाद्यसामर्थ्यभगवत्संगसाधुबलस्नेहादिविधानम् कृतम्।

- चतुरशीत्योत्तरशततमे- आत्मसत्तासुखोपनिषन्नामके

आत्मस्थित्या स्यात्सुखं वै सुषुप्तौ, दुष्टैर्देशाद्यैश्च दु:खं भवेद् वै।
मार्यादायां शान्तिरास्ते शते तुर्याशीत्यूर्ध्वे प्रोक्तमेतत्तु वीचौ।।

त्रिगुणसंगत्यागपूर्विकात्मसत्तावन्निष्ठसुखित्वभगवन्निबद्धमर्यादापालकनिष्ठात्मसत्ताकसुखित्व- सद्देशकालादिवज्जननिष्ठसुखित्व-तद्विपरीतवर्तनवन्निष्ठाऽसुखित्वोद्वेगादिमत्त्वादे: प्रतिपादनम् कृतम्।

- पञ्चाशीत्योत्तरशततमे- त्यागिगृहिसुशोभोपनिषन्नामके

शोभा या गृहिणां सतां तु नहि सा दोषात्मिका वै मिथो,
विज्ञो वेत्ति सुशिक्षितं मुनिवचो मूढोऽत्र वै मुह्यति।
ईर्ष्यावर्जितभक्तिमुत्तमविधां श्रद्धान्वितां त्वाचरेत्,
पञ्चाशीत्यधिके शतेऽभिकथितं वीचौ तु यद् रोचते।।

त्यागिनां गृहस्थानां च धर्माणां विनिमये शोभनाऽभाव सुशिक्षिणगुणग्राहित्वसुश्रद्धाऽनीर्ष्यापूर्वकभक्ति कृज्जननिष्ठभगवद्रूचिमत्तादि विवेचिता।

- षड्शीत्योत्तरशततमे- मोहापसरणोपनिषन्नामके

मोह: स्वदोषाऽनवभास एववै साधौ हरौ चाप्यगुणग्रहोऽपि स:।
हरिस्वरूपे महिमाऽतिवर्जितो स मूर्ख उक्त: षड्शीतियुक् शते।।

भगवत्तत्साधुनिष्ठगुणोद्देश्यक दोषबुद्धिनाशदिव्यत्वभाननिजात्मस्वरूपज्ञानादिविवेचनं कृतम्।

- सप्ताशीत्योत्तरशततमे- भगवद्वशीकरणोपनिषन्नामके

सत्संगेन वशी भवत्यतितरां श्रीस्वामिनारायण:,
साधुष्वात्मसुबुद्धिमन्निजजने सत्संगिनि प्रीतिमान्।

।।जय स्वामिनारायण।।

श्रीहरिवाक्यसुधासिन्धौ उपनिषदां प्रभाव:

---

सत्प्रीत्युज्झितदेहिनीह वृषतालम्ब श्रुतित्वं मतम्,
सप्ताशीति युते शते वचसि वै श्रीस्वामिनाथोऽवदत्।।

सत्संगनिष्ठभगवद्वशीकरणहेतुत्व- साधुनिष्ठस्त्रीपुत्राद्यधिकस्नेहवत्वादि विवेचितम्।

- अष्टाशीत्योत्तरशततमे- श्रीहर्यलौकिकोंगोपनिषन्नामके

श्रीधार्मिकेण स्वरूचि: सुवर्णिता स्वैकान्तिकानां च सुलक्षणान्यपि।
कार्यो निजात्माऽच्छविचार ईरितस्त्वष्टाश्यशीतिप्रयुते शत[illegible]।।

भगवद्रूच्यंगगुणस्वभावात्मज्ञानगतमायामिश्रणनाशसुवर्णस्तेयदृष्टान्तपूर्वकशुद्धिप्रदर्शनादे· निरूपणं कृतम्।

- नवाशीत्योत्तरशततमे- श्रीजीप्रीत्युपनिषन्नामके

प्रीतिप्रशंसा विहिता तु मुक्तव्याजेन देशाहिपराभवश्च।
संसारतुच्छत्वमथो नवाशीत्यूर्ध्वे शते चाऽप्यपराभवश्च।।

भगवति प्रीतिकरणस्य- मायिकप्रीतित्यजनस्य- कुसंगकृतपराभवत्यागस्य च विवेचनम् कृतम्।

- नवत्योत्तरशततमे- समहिमप्रीत्युपनिषन्नामके

सत्तास्वरूपात्मनि मायिकावृत्तिर्विनाशनीयाहरिदृष्टिरोधिनी,
हृदिभ्रमो नाशनीय: सदा हरे: प्रीतौ सुविघ्नात्मक एव बुद्धित·।।
मार्जारभक्तत्वमथापि नैव तु कर्तव्यमेवाऽत्र ममोपदेशने।
न कातरत्वं तु विधेयमात्मना न्यूनाधिकस्नेहवतोऽपि नाकिता।।
भवेदेवेति मे भक्तिं कुर्यान्नवतियुक्शते।
वचोमृते तु कथितं भक्ते याम्यगतिर्न वै।।

परमात्मनि स्वात्मनि च मायावरणाऽभावादेव सत्यप्रीतिकरणताया:, विघ्ननिवारणस्य, बिडालभक्तत्वाऽकरणस्य, मद्वार्ताकरणत्वाऽकातरस्य, न्यूनप्रीतिमन्निष्ठदेवादिजन्मप्राप्त्युत्तरपरमपदलाभस्य च विवेचनम् कृतम्।

- एकनवत्योत्तर शततमे- सम्प्रदायपुष्ट्युपनिषन्नामके

स्वसम्प्रदायस्य सुपुष्टिरूक्ता स्वकीयशास्त्रैर्न तु चान्यशास्त्रै।
आज्ञा निजग्रन्थविधानरूपा प्रोक्ता शते चैकनवत्यधीते।।

---

मुक्तमुनिमधिकृत्यसम्प्रदायपुष्ट्यर्थस्वीयशास्त्रविरचनाज्ञा - धर्मभक्तिपालन-स्वेष्टदेवदृढोपासनकरणात्मकाऽऽज्ञा प्रदत्ता।

- द्वानवत्योत्तरशततमे- परमकल्याणकारित्वोपनिषन्नामके

कल्याणकारित्वमथास्ति मे सतां स्नेहाद् विधेयं सततं सुसेवनम्।
प्राग्जन्मलब्धद्वयनिश्चलत्वकं प्रोक्तं शते द्वानवतींगिते स्फुटम्।।

भगवत्तत्साधुप्राप्तिपरमकल्याणतत्सेवा प्रीतिमत्कृतार्थत्वतदुपदेशानुवृत्तिस्निग्धत्वतत्परमनिश्चयवत्वादिविवेचनम् कृतम्।

- त्रिनवत्योततरशततमे- चेतनाऽविक्षेपोपनिषन्नामके

स्वप्ने विघ्नोऽस्ति जीवे हरिशरणिजने साम्यता भक्तवृत्तौ,
त्वन्यश्चाण्डालतुल्यो विमुखचरणभागभक्तंरक्षाकरस्य।
सर्वाऽधानां विनाशो मुनिवचनविहीनस्य मोक्षो न भावी।
यावत्साधुप्रसाम्येक्षणगविमुखता भक्तपक्षी प्रभक्त:।।
भक्तद्रोग्धा न मे स्यात् दयित इति मदीयेषु भक्तेषु पक्षी,
पूर्णो भक्त: स मे स्यादिति विशदतमं प्रोक्तमत्र प्रवीचौ।
दत्तात्रेयाऽऽर्षभाणां त्रिनवतिशतके सत्सुद्रष्टान्तमुक्तम्,

आत्मगतविक्षेपाऽभावभक्तापक्षवर्तिविमुखभक्तरक्षकसर्वपापराहित्यसर्वसाधुसाम्यंकथकविमुखत्वभगवद्दयाकुलत्वादे: विवेचनम् कृतम्।

- चतुर्नवत्यधिकशततमे- पक्वसत्संग्युपनिषन्नामके

पक्व: सत्संगिवर्यो निगदित इह सर्वाग्रगण्य: सभायां,
त्यागे शीले वृषे स्याद्धरिवर विषये निश्चये यो दृढश्च।
लोके य: स्यात्प्रतिष्ठापुरूतरविभवो मान्य एषोऽग्रतो वै,
प्रोक्तं त्वेतच्छते यच्चतुरधिनवतिप्राञ्चिते सत्तरंगे।।

परिपक्वसत्संगिमहद्हरिभक्तश्रेष्ठतमत्यागिलोक प्रतिष्ठितसम्माननादिविवेचनम् कृतम्।

- पञ्चनवत्योत्तरशततमे- भगवत्परायणांगोपनिषन्नामके

भजने पुरूषापदग्धता भगवत्सेवनतोऽक्षरे गति:।
अतिदास्य पतिव्रतावषाऽऽत्मनिष्ठा इति मोक्षहेतव.।।
दृढ़ता ह्युचिता त्रिहेतुकी नियमे स्थेयममान्द्यभावत:।

---

शरणस्थकृतार्थतोदिता शतके पञ्चनवत्यधिश्रिते।।

संसारिकृतैकाग्रयपूर्वकघटिकाभजनप्राप्यमोक्षस्य, सर्वस्वभगवत्परायणलभ्यमोक्षस्य आत्मनिष्ठापातिव्रत्यदास्यान्यतमलभ्यमोक्षस्य, साधुसेवाकृपाप्रसन्नतालभ्य मोक्षस्य, सत्संगीयनियमपालनजन्यभगवत्प्रीतिलभ्यमोक्षस्य, मायाकालाद्यनभिकमितसाधारण भक्तलभ्यदासानुदास्य फलमोक्षस्य च निरूपणं कृतम्।

- षण्णवत्योत्तरशततमे-सेवाश्रद्धाज्ञातृत्वोपनिषन्नामके

विचारे ज्ञातृत्वं चितिगतिमजस्त्रं बलयुतम्,
बलप्राप्तौ सेवा विविधपुरूभक्त्यादिसहिता।
तथा श्रद्धा सत्तामयनिजसुनिष्ठाऽतिबलिनी,
सतां दिव्यत्वं षण्णवति शतवीचौ निगदितम्।।

द्रष्टृदृश्यमध्यवर्तिविचारगतजीवात्मज्ञातृत्वभगवत्तत्साधुसेवालभ्याऽत्मबलिष्ठत्वाऽऽत्मसत ताकवर्तनवत्सर्वव्याधिशान्तत्व - सत्समागमार्थक देहधारिभवनश्रेष्ठत्वसर्वोपाधिनिर्वतकसाधुमहिमवत्वसाधुद्रोहिनिष्ठभगवद्रूचिकत्वसाधुसेवनादिवि ववेचनम् कृतम्।

- सप्तनवत्योत्तरशततमे- सृष्टिश्रेय: कारित्वोपनिषन्नामके

सर्वेऽवतारा न समा यत: श्रीकृष्णोऽवतार्यस्मि हरिर्हि धार्मि:।
भक्तप्रमोदार्थमिलां प्रयामि, प्राकट्यमेवात्र तु दिव्यमस्ति।।
सर्वान्वितश्चास्मि ततोऽतिरेकी भवामि नैकस्वरूपसंस्थ:।
प्रोक्तं तु सप्ताधिकनवत्युदूर्ध्वे शते तरंगे निजगौरवं वै।।

भगवदवतारतारतम्य श्रीकृष्णभगवदाधिक्य श्रीहरिकृष्णभगवत्सर्वावतारित्व सर्पोपरित्वप्रतिपादकस्याऽक्षरधामस्थसृष्टि प्रवाहस्थब्रह्माण्डान्तर्धृतमानववेषस्थैक्यस्य सृष्ट्यन्तर्गतजीवकल्याणकतृत्वस्य महाप्रलयाऽभावस्य खण्डप्रलयस्य सृष्टिसर्जनप्रवाहाऽऽविरामस्य स्वेच्छाधृतदिव्यभक्तप्रसन्नार्थदिव्यप्राकट्यस्य परोक्षाधारव्याजकाऽपरोक्षस्व सर्वोपर्युपासनोपदेशस्य च निरूपणं कृतम्।

- अष्टनवत्योत्तरशततमे- निर्गुणभक्तिनिष्ठोपनिषन्नामके

भक्तप्रसेवादि निमग्नवृत्तिके जना अभक्ता पुरूदूषणानि वै।
प्रकल्पयन्त्येव मयि प्रमोहिनो भक्तास्तु नैर्लेप्यमितीरयन्ति यत्।।
वैराग्यनैजात्मसुनिष्ठिकावतां न बन्धनं मायिकतत्वभोगजम्।
निरर्थके ज्ञानविरागके हरिर्विना तु भक्तिं परमार्थदायिनीम्।।

आत्मस्थितिश्चापि विरागवर्तनं भक्तिस्तथा यस्य स भक्तराट्महान्,
मतो ह्यनन्योऽष्टनवत्युदूर्ध्वके शते तु वीचौ गदितं यथार्थत:।।

भगवदवतारनिर्लेपत्वदिव्यत्वस्यमूर्खमोहकृतदोषस्य भक्तभावनादिव्यत्वस्य परोक्षश्रीकृष्णप्रतिपादनाधारनैजीयपुरूषोत्तमत्व कथनस्य मोक्षार्थसाधनचतुष्टयस्य मुख्यभक्तेरैकान्तिकत्वस्य च निरूपणं कृतम्।

- नवनवत्योत्तरशततमे- ब्रह्मरूपताफलोपनिषन्नामके

आश्रयाद् भगवतो हि मोक्षणं, साधनैस्तु भगवत्प्रसन्नता,
पाल्यमेव वचनं तु सेवकैश्चेतनस्तु गदितो निराकृति:।।
आन्तरस्थहरिसाक्षिमूर्तिमानान्तरस्थ हरि वेषवेषित:।
सोऽयमेव परमोक्षणे भवन् वेषवान् चितिसुमूर्तसाकृति:।।
योगजात्मदृशिसिद्धमुख्यताहेतुरस्त्यभिमतिप्रधानता।
स्तोत्रकृत्यविधि तन्निरस्यता अन्यकौतुकहतो न भक्तराट्।।
ब्रह्मतामिह यथैति धाम्न्यपि श्रीहरेर्हि कृपया स तादृश:।
ज्ञानवान्नवतियुङ्नवाधिके प्रोक्तमत्र शतके तरंगके।

प्राक्कृताऽपराधात्मक पापबुद्धेर्हरिभक्त दोषग्राहे कारणताया:, आशीर्वादात्मकपुण्यबुद्धे: परगुणग्रहे कारणताया: आश्रयस्यैव भगवत्प्राप्तिमुक्तिसाधनताया: धर्मादीनां प्रसन्नतासाधनताया: मायिकाकारहीनात्मनो: गर्भगतसाक्षिसाकारानुसाकारताया: भगवद् धाम्निचेतनचैतन्याविर्भूतसुमूर्तसाकारताया: भगवत्तत्साध्वाशीर्वादलभ्ययोगसिद्धयात्मब्रह्मदर्शनवतोऽपि भगवत्तत्साधुगतोत्कृष्टवृत्तिमत्ताया:, अज्ञानकृतगौणीभावनात्मकन्यूनतायास्तु शुकादिकृतभक्त्यादिनिदर्शनद्वारकोत्सारणताया: भगवद्यथार्थनिश्चयवतो यन्त्रमन्त्रादिकर्तरि अनास्थाया: भगवद्भक्तस्य जीवतोऽत्र कथावार्तादिसहितब्रह्मरूपतालाभवत्ताया. तस्य धामगतस्य भगवत् सारूप्यादिमुक्तिमत्तायाश्च स्पष्टं प्रतिपादनं कृतम्।

- द्विशततमे- सेव्यसेवकभावोपनिषन्नामके

मत्प्रवित्त्यनुगुणस्तु मोक्षत्रग: स्वामिसेवक: विधो हि जायते।
सर्वसाम्यभवनोऽपि भेदवान् वीचिके द्विशतके तदीरितम्।।

भगवदुपासनानुरूपयावद्विधाऽऽप्तिमत्वेऽपि सर्वनियामकत्वाऽलब्धेरेव भावनानुकूलस्वामिसेवकभावस्य शाश्वतत्वं मुक्ताविति वर्णनं कृतम्।

**।।इति दुर्गपुरीयमध्यमप्रकरणस्य तरंगा:।।**

## ।।अथ वृत्तालयप्रकरणस्थतरंगाः।।

- एकाधिकोत्तरद्विशततमे- निर्विकल्पकसमाध्युपनिषन्नामके

चित्तस्य रोधात्खलु रूध्यतेऽसुः स निर्विकल्पाख्यसमाधिरूक्तः।
सुनिश्चयो यस्य हरावचाल्यः स निर्विकल्पोऽस्थ ततश्च मोक्षः।।
विकल्पसंकल्पमतो न स स्यादेकान्तभक्तो नहि कल्पनायुक्।
मनोजये यत्नवतोऽपि वै स्यात् कल्याणमस्येति मनो ज्येद्धि।।
जन्मान्तरे श्रेय उतापि वै स्याद् योगच्युतस्येति समीरितं तत्।
एकाधिके वै द्विशते तरंगे मृधे यथा कौरवपाण्डवानाम्।।

पारिभाषिकनिर्विकल्पकसमाधिमतो मन्निश्चयवतो मदाश्रयवतो मुक्तिः, मद्धाम मूर्तिदर्शनादिविकल्पात्मकसविकल्पकसमाधिमतो योगभ्रष्टस्य जन्मान्तरेऽपि मुक्तिभाक्त्वमिति निरूपितम्।

- द्वयोत्तरद्विशततमे दिव्यमूर्त्यद्रोहोपनिषन्नामके

अद्रोहस्तु हरेः प्रसादजनको विश्वादिकर्ता हरिः,
मर्याकालपुमांस एत तु हरेर्वै शक्त्य कीर्तिताः।
मूर्तस्यैव हरेः किशोरवयसो दिव्यस्य शास्त्रेष्वपि,
ध्येयत्वोक्तिरूदीरिताऽस्य तनवो दिव्यास्तथा धामसु।।
शास्त्राणां हरिदिव्यसाकृतितनौ तात्पर्यमेवास्ति यत्
श्रुत्वा त्वैक्षत स प्रभुः सुरचनाद्यर्थं हि सृष्टेस्ततः।
दिव्यज्ञानगुणादिशक्तिसहितो दिव्यस्वरूपोऽन्यथा,
द्रोहः स्यादिति वै द्वियुक्द्विशतके वीचौ तदुक्तं स्फुटम्।।

वेदशास्त्रादिप्रतिपादितसाकारमूर्तिपरब्रह्मपुरूषोत्तमनारायणतदवतारादीनां निराकारतादिबोधात्मकद्रोहो नैव कर्तव्य इति भगवत्प्रसन्नता साधनस्य साकारबोधस्य च निरूपणं कृतम्।

- त्र्योत्तरद्विशततमे पराभक्तिसाधनोपनिषन्नामके

भवेदिहैकान्तिकता तु भक्त्या परानुरक्त्या हि हरौ विरक्त्या।
निजात्मबुद्ध्या स्ववृषाधिसक्त्या सेवार्हभक्ता उदिताश्चतुर्धा।।

LIBRARY

दीपाऽभमहाप्रदीपिकाऽभतडिदाभौर्वाभात्मकचतुर्विधसत्पुरूषमध्यतस्तृतीयचतुर्थसेवनं पराभक्तिसाधनमिति सर्वसाधनसमानाभिहारत्वं च पराभक्तेरेवेति निरूपणं कृतम्।

- चतुरूत्तरद्विशततमे मूर्तिधारणसांख्ययोगोपनिषन्नामके

द्वात्रिंशल्लक्ष्मयुक्तै: सह मम मनसा कर्मणा चापि वाचा,
साधो: संगे तु यावत्कृतकरणसमावेश एवास्ति कृत्स्न:।
वृत्तिर्द्वेधा प्रकृत्वा मम सुभगछविं धारयेद्वै हृदि स्वे,
बाह्यां मूर्तिं प्रधार्याऽऽन्तर छवि सुयुतां सम्प्रसाध्यैक्यमृच्छेत्।।
नित्यं योगस्य सर्वा: प्रविदितसुकला: साधयेद् ध्यानयोगे,
कृत्वान्तर्मूर्तियोगं हरिवर सुतनुं चेतने लोकयेच्च।
एवं मोक्षस्य हेतुर्भवति भगवति स्नेह सेवात्मकस्य,
प्रोक्तं त्वेतच्चतुर्युग् द्विशततमवचस्यत्र मोक्ष: फलं वै।।

सांख्येन मायिकनिषेधपूर्वयोगकलाभिर्बहिरान्तरमूर्तिधारणाभिरभ्यसनीयं साधुसेवायां सर्वसाधनावगमो निरूपित:।

- पञ्चोत्तरद्विशततमे मायोत्तारकनिश्चयोपनिषन्नामके

भगवत्पुरूदिव्यबोधवान् स जयेन्मायिकमत्र भक्तराह्।
शरणोत्थफलाऽघदग्धता व्यवहारो हरिधीपरीक्षक.।।
हरिसत्पुरूषप्रसेवनं भगवत्सेवनतुल्यसत्फलम्।
वचसि द्विशतेऽत्र पञ्चगेऽभिहितो वै मम भक्तनिश्चय:।।

भगवदमायिकताबोधवद्भक्तस्याऽमायिकत्वं, भक्तस्य महापत्कालेऽपि रक्षाऽर्थनाऽकरणं, मच्छरणागतस्यापि निश्चयमन्दस्य सत्संगसमुदायाऽनि वासवत्ताया: सतां सेवया न्यूनतानाशस्यान्यथाबहुजन्मभि: स्वयत्नजन्यन्यूनतानाशस्य च निरूपणं कृतम्।

- षटोत्तरद्विशततमे बलाबलदैव्युपनिषन्नामके

कर्मस्वभावसमयप्रपुमांस एते न स्वीयकार्यकरणे क्वचिदूत्स्वतन्त्रा:।
सर्वेशवाञ्छननियन्त्रण तस्तु शक्ता क्वापि स्वकार्यबलिताऽस्ति हरीच्छया सा,
धाम्नस्तु भक्तजनमोक्षणकारणार्थं लोकेऽत्र यर्हि प्रकरत्वमुपैति चेत्र।
स्वातन्त्र्यमेव खलु तत्र हरे: समुक्तं षट्संहितद्विशतकेऽत्र तरगके वै।।

---

कालकर्ममायापुरूषस्वभावाऽदृष्टानां भगवदिच्छाधीनकारणताप्रतिपादनस्य कालादीनां क्वाचित्कप्राबल्येऽपि केवलकारणतारहितत्वस्य निरूपणं कृतम्।

- सप्तोत्तरद्विशततमे दैवासुरजीवोपनिषन्नामके

नैवासुरा वै प्रभवन्ति दैवा भवन्ति वै ब्रह्मणि लीनताभ्य.।
ह्यन्वियत्वव्यतिरेकिते तत् सप्ताधिके वै द्विशते समुक्तम्।।

आसुरजीवानां बहुकल्पीयखण्डप्रलयेषु मुहुर्ब्रह्मणिलयाविर्भावैर्दीर्घयुगप्रलयान्तरदैवित्व प्राप्ते., परब्रह्मणोऽन्वयव्यतिरेकभावस्य च वर्णनं कृतम्।

- अष्टोत्तरद्विशततमे - ध्यानवृत्तिनिद्रोपनिषन्नामके

हरेर्ध्यातुर्वृत्तेर्भगवति सुमूर्ते चिरलयो,
भवत्येषा निद्राऽभ्यसनवशजा योगिमुनिगा।
सदा ह्येषा साध्येत्यभिहितमिदं तु द्विशतके,
तरंगेऽष्टप्राज्ये विशदमिति लूतोर्णदिशतः।।

लूतोर्णस्थितिदृष्टांतेनाऽऽत्मना वृत्तिसंकोचः परमात्मनिवृत्तिलय साक्षात्कारोऽयं योगनिद्रेतिप्रतिपादनं कृतम्।

- नवोत्तरद्विशततमे भगवत्सुखोपनिषन्नामके

प्रोक्तं सुखं हरेर्मूर्तेर्निर्गुणं तु समाधिगम्।
क्षणं युगायते प्रोक्तं नवाधिद्विशतेंऽककेः।।

भगवन्मूर्तिसुखस्य सहस्त्रवर्षाधिकसुखानुभवस्य निरूपणं कृतम्।

- दशोत्तरद्विशततमे - द्वेधाऽवतरणोपनिषन्नामके

प्रत्यक्षो भगवान्नृपाधिपतनुर्वा साधुरूपो मिलेत्,
मोक्षः स्यात् शरणेन तस्य तु चवा तत्साधुमुन्याश्रयात्।
मूर्तौ भक्तित एव चापि च तथा श्रेयो भवेदात्मनः,
प्रोक्तं तद् दशसंयुते द्विशतके वीचौ स्वभक्तिस्थितेः।।

नृपरूपसाधुरूपभगवतदवतारविलक्षणत्वभगवत्तन्मूर्तिसाध्वाश्रयजन्याऽऽत्यान्तिकमोक्षणस्य चोपदेशः कृतः।

---

- एकादशोत्तरद्विशततमे - चतुर्द्रोहाऽकरणोपनिषन्नामके

भक्तदीनधरणीसुरद्विषां नाश एव जडदेहिताऽऽप्तित:।
दोषहेतुरतिमान ईक्षितो मानिभक्तिरिति चासुरी मता।।
मत्प्रभक्तजनदोषकृच्चयो मन्महित्वरहित: स एव वै।
दोषदर्शनपरस्तु यो मयि शिष्यते स नहि मोक्षभाग्भवेत्।।
सत्सु चात्मदर्शिसाधनं मयि प्रीतिरस्ति मम दर्शनं तत.।
द्वेशते वचसि चोक्तमेव चैकादशाधिक इतीह सर्वथा।।

चतुर्द्रोहाऽकरणस्य कामादिपराभूतपण्डितगतसाधुजनाऽमाहात्म्यस्य प्रीतिजन्यमहिमज्ञानजन्यब्रह्मरूपताभवनस्य प्रतिपादनं कृतम्।

- द्वादशोत्तरद्विशततमे निश्चयसौभाग्योपनिषन्नामके

धाम्न: समायातहरेर्महिम्ना सर्वांगसम्पन्नसुभक्तराट् स्यात्।
प्रीतेरभावात्तु भवेत्क्षयो वै संप्रीतभक्तेक्षणतोऽपि मुक्ति:।।
मत्संगि वृक्षादि सुमुक्तिभाक् वै श्रेयो न वै मन्निश्चिय वर्जितस्य।
स्पष्टं समुक्तं द्विशते तु तद्द्वादशाधिकं सद्वचनामृतेऽत्र।।

भगवत्समाहात्म्यनिश्चयिनो मोक्षभाक्त्वं परमोक्षकारित्वं च, निश्चयहीनस्य कल्याणमार्गात्पतनं तत्संगिनोऽपि पतनमिति प्रतिपादितम्।

- त्रयोदशोत्तरद्विशततमे साहजिकचमत्कृत्युपनिषन्नामके

साधुस्वरूपे नृपतिस्वरूपेऽवतारिणीहाऽप्यवताररूपे।
अलौकिकत्वं च मदीक्षकाणां समाधिमत्वं, भवति स्वभावात्।।
धामस्थितोऽनन्तसुसृष्टिमध्यग: साकारसद्व्याप्तसुदर्शनप्रद:।
चमत्कृतिर्दर्शनकारिणां त्रयोदशाऽधिके वै द्विशते समीरितम्।।

द्विविधभगवदवतारमूर्तिसमाकृष्टचित्तद्वारकसमाधिलाभस्य सुमूर्तश्रीहरे. स्वप्रकाशान्तर्यामित्वादिशक्तिद्वारकस्वेच्छाप्रयुक्त प्राकट्यद्वारकव्यापकत्वस्य च निरूपणं कृतम्।

- चतुर्दशोत्तरद्विशतमे- गुणग्राहपुण्योपनिषन्नामके

महत्तमं पुण्यमथो गुणग्राहेणाति वै स्याद्हि सतां तु तेन।
समाधिरेवात्र भवेद्धि साधारणस्य जीवस्य कुपात्रिणोऽपि।।
स्याद्धार्मिकश्चापि सतां तु दोषग्राहीति पापान्न भवेत् समुक्त.।

चतुर्दशोर्ध्वे द्विशते तरंगे प्रोक्तं च तीर्थाऽघमु वज्रलेपम्।।

भगवत्तत्साधुगुणग्रहणात्मकमहापुण्यजन्यकुपात्रजीवचित्तशुद्धिभगवन्मूर्तिलग्नताजन्यसमाधिवत्त्वस्य भगवत्तत्साधुजनगुणग्रहणधर्मतदवगुणग्रहणाऽधर्मस्वरूपस्य च निरूपणम् कृतम्।

- पञ्चदशोत्तरद्विशततमे - शुद्धसत्ताकजीवोपनिषन्नामके

> दैवास्तथाऽसुरविधाः खलु चेतना ये तेऽनादयोऽप्यथ भवेयुरतस्तु सृष्टौ।
> सत्तामयाः प्रकृतिगाः कृतकर्मभावाः पश्चात्तु पञ्चदशयुक् द्विशते तदुक्तम्।।

श्रीहरितत्साधुजनकृपया जीवानां दैवित्वं मोक्षगामित्वम्, अनादिकालतस्तु मायागतानामपि दैवासुराणामपि स्वरूपतो जीवानां तदनुभयविधत्वं ततो कर्मयोगादुभयविधत्वमिति भगवत्यनादिरीतिरितिप्रतिपादितम्।

- षोडशोत्तरद्विशततमे- भक्तिमदोपनिषन्नामके

> हरेः प्रभक्तौ सुखमेव यावत् तावन्न राज्यादिमदेऽस्ति दिव्यम्।
> ब्रह्माण्ड सौख्यं निरयेनतुल्यं सतां प्रभक्तेः कुरूताऽतिसंगम्।।
> महामनुष्याय न दृश्यते चमत्कृतिर्न मेऽत्रास्ति रूचिस्तु भक्तिगा।
> सा वै समज्या निजमोक्षणाय षोडशाधिके यद् द्विशतेऽत्र वर्णितम्।।

महाजनानां वनराजमदवत्ताभगवद्तद्भक्तानां त्यागभक्तिमदवत्ता साहजिक सत्संगप्रचारेष्टता सत्संगिरक्षणेष्टता च निरूपिताः।

- सप्तदशोत्तरद्विशततमे- भक्तिमज्जितेन्द्रियत्वोपनिषन्नामके

> जितेन्द्रियत्वं विषयेषु पञ्चसु त्वासक्तिराहित्यमिति स्वजीवने।
> कल्याणकारिस्वगुणाऽर्जनं हरौ नवप्रकारैः परमभक्तिवर्तनम्।।
> कामादिदोषान्परिहाय नैवम प्रपालनं भक्तसुभक्तिसेवनम्।
> कृपास्पदं सप्तदशोध्वंके वचस्यमीरितं वै द्विशते स्फुटं स्वयम्।।

केवलात्मनिष्टभक्तिरहितनिवृत्तिमार्गस्थत्यागिजनापेक्षयाभक्तिसहितवर्तमाननियमस्थप्रवृत्तित्यागिनो जितेन्द्रियत्वं श्रेष्ठतमत्वं चेति प्रतिपादितम्।

- अष्टादशोत्तरद्विशततमे- गुरूपरम्परोपनिषन्नामके

> सम्प्रदायगुरूसत्परम्परामुख्यशास्त्र नियमाऽर्हमूर्तयः।
> स्वेष्टदेव इह चाक्षरेऽस्ति यः श्रीहरिः स्वयमुपाप्तिगोचरः।।

---

नैव मेऽनुकरणं चरेत्कृचित् मत्प्रसंगिजनैर्निर्गुणत्वकम्।
प्राह तद्द्विशतकेऽष्टयुग्दशाढ्ये तु वै विशदमेव चापरम्।।

सम्प्रदायगुरूपरम्पराशास्त्रदीक्षाऽऽचार्योपास्येष्टदेवतद्बहुस्वरूपतदवतारतद्धर्म भक्तिनियममूर्तिबाहुल्येष्टदेवाऽऽचरणाननुकरणात्मकोपदेश स्वरूपस्य निरूपणम्।

- एकोनविंशोत्तरशततमे- भगवत्तत्साधुविचरणोपनिषन्नामके

मत्प्रीतिरूक्ता परित: प्रकार्या मत्साधुसंगेन भुवि स्वभक्ते.।
निर्वासनोपासकभक्तवर्यो लभेत धाम्नोऽतिसुखं ममापि।।
सवासनो याति सुरादिलोकान् मायाप्रसौख्यं निरयोपमं तत्।
ममाभिबोधान्मम भक्ततोक्ता त्वेकोनविंशे द्विशतोर्ध्ववीचौ।।

प्रत्यक्षभगवत्तत्साधुजनज्ञानपूर्वकाऽऽश्रयजन्यमोक्षसाधनमायिकविषयनिरयत्यागादि विवेचनम् कृतम्।

- विंशोत्तरद्विशततमे- कामादिदोषबीजदग्धतोपनिषन्नामके

साराऽसारविवेकबुद्धिजनिताद् ब्रह्मात्मबोधात्तु वै
कामक्रोधसुदग्धबीविकृति: स्यान्मोहनाशस्तथा।
नो कार्योऽपि कुसंग एव नितरां प्रोवाच विंशोधिके
स्पष्टं तद् द्विशतेवचोमृत इति श्रीस्वामिनारायण:।।

ब्रह्मात्मज्ञानदुर्बलस्याऽसद्देशादिपराभवशीलस्य कामादिविकारापत्तेरेव भगवन्मूर्तिबलसहितदृढात्मब्रह्मज्ञानस्य विकारनाशहेतुत्वे मुख्यताया: विवेचनं कृतम्।

## ।।इति वृत्तालयप्रकरणस्थतरंगा:।।

## ।।अथ श्रीनगरस्थतरंगाः।।

- एकविंशोत्तरद्विशततमे- ध्यानसिद्ध्युपनिषन्नामके

धृत्वा नेत्रगुहेऽर्कमिन्दुमुरूधा तत्तेजसोर्भानत:
कार्यस्तत्र तु चोभयोर्विनिमय: पश्चाद् हृदि स्वात्मनि।
ध्यातव्यस्यश्च हरिस्ततोऽस्य भवते विश्वासादिसंदर्शनं
सिद्धः स्याद् द्विशते वचस्यभिहितं तत्वेकविंशान्विते।।

सूर्यचन्द्रध्यानद्वारकाऽऽमतत्साक्षिमूर्तिध्यानसिद्धिप्रतिपादनम् कृतं वर्तते।

- द्वाविंशोत्तरद्विशततमे- ज्ञानिब्रह्मरूपभक्तश्रैष्ठ्योपनिषन्नामके

परित्यक्त्वा मायाविरचितमुपाधिं तु भजने

---

हरिं श्रेष्ठो भक्त: प्रभवति स विज्ञानविभव:।
समर्थोऽयं नैजे प्रकटतनुमत्वे द्विशतके
तरंगे द्वाविंशान्वित इति सुगम्यं मतिजुषाम्।।

ज्ञानिभक्तिमच्छुद्धब्रह्मरूपभक्तस्य श्रैष्ठ्यं मायिकोपाधिकणांशसहितस्य न श्रैष्ठ्यमिति निरूपितम्।

- त्रयोविंशोत्तरद्विशततमे- उपशमितविषयाऽबाधोपनिषन्नामके

विषयपञ्चकलम्बितजीवनश्चिति गणोऽस्ति हि रागसमन्वित.।
जनिमृती ह्युपयाति मुहुस्तु यो मम सुमूर्तिपरोऽक्षरगो भवेत्।।
उपशमं समयाति महित्ववत् ममसतां समसेवनतत्पर:।
विगतमानजनोऽस्ति कृपालयो मम तु धर्मकुलं सितहृन्मतम्।।
निजवृषस्थजना: पुरूभावत: प्रकुरूताऽतिसहायमतोऽस्य वै।
द्विशतके त्र्यधिविंशतिसंयुते कथितमेतदतिस्फुटमुत्तमम्।।

आत्मब्रह्मसत्ताकं ज्ञानिजननिष्ठविषयचिन्तनाभावप्रयुक्तोपशमस्य साधुसेवनजन्यकृपाप्रसन्नतालभ्योपशमस्यसंसारनिवर्तकस्य प्रविवेचनम् कृतम्।

## ।।इति श्रीनगरस्थ तरंगा:।।

# ।।अथ दुर्गपुरीयान्त्यप्रकरणस्यातरंगा:।।

- चतुर्विंशत्योत्तरद्विशततमे- निर्विघ्नभक्त्युपनिषन्नामके

वैराग्यं तु निजात्मनिष्ठसहित ज्ञानागवत्ता तथा,
स्नेहांऽगाऽवितात्वपेक्षिततमा शिक्षासुपत्र्याजिका।
भक्तौ स्यान्नहि विघ्नमेभिरिति वै दाढ्र्यं भवेत्सर्वथा,
वीचौ वै द्विशतेऽत्र तुय सहयुग्विंशान्विते वर्णितम्।।

वैराग्यात्मनिष्ठाज्ञानप्रीतिमद्भक्तभक्तिनिर्विघ्नताया: शिक्षापत्रीपाठादि विधानस्य च प्रतिपादनं कृतम्।

- पञ्चविंशोत्तरद्विशततमे- निबद्धांगोपनिषन्नामके

सत्संगस्य बलाद् भवेत्तु सुतरामंगादिबन्धो दृढ,
संस्कारास्तु सतां प्रसंगजनिता. धाम्न्यत्र मूर्तौ तु मे।
ऐक्यं यस्य स मोक्षभाक् सद इदं ब्रह्मादिपर्षद्वरं,
प्रोक्तं श्रीहरिणा स्फुटं द्विशतके वै पञ्चविंशान्विते।।

जगत्प्राधान्यकारणीभूतपञ्चानां
भगवत्प्राधान्यकारणीभूतसत्संगमाहात्म्यज्ञानदिव्यत्वादिनिरूपणं कृतम्।

- षड्विंशोत्तरद्विशततमे- दयास्नेहोपनिषन्नामके

हेतु: स्नेहो दयायुग्जनिमृतिसृतिदो ज्ञानवैराग्यनाश्य,
श्चात्मज्ञानित्वमात्रं नहि परिगणितं भक्तिपुष्टिप्रदं वै।
नष्ट: कौसंगपाशो न भवति च तत: स्निग्धताऽऽप्याहरौ षड्
विंशाढ्ये द्वे शतेश्रीहरिवरगदितं ब्रह्मरूप प्रभक्तै:।।

ब्रह्मीभूतभक्तनिष्ठसततदयास्नेहराहित्यविवेचनम्।

- सप्तविंशोत्तरद्विशततमे- बाधितानुवृत्त्युपनिषन्नामके

बाधानुवृत्ति विगमस्तु सुनिर्विकल्पात् स्यार्द्धसमाधित इतीह तथापि न स्यात्।
श्रेयो हरेर्विमुखदेहिन इष्टभक्तो यायाद्विनापि तु समाधिमतोऽक्षरं वै।।

देहे स्थितोऽस्ति हि कथं परितो निजात्मा, एकत्र वै हृदि कथं स च साक्षियुक्त: ।
सोऽयं न तिष्ठति निराश्रएव सप्तविंशाधिके द्विशतके कथितं तरंगे।।

निर्विकल्पकसमाधितो बाधितानुवृत्यभावस्य, सविकल्पकजाग्रदादिमद्भक्तस्य बाधितानुवृत्तिमत्वे परमोक्षवत्त्वस्य हृत्स्थविशेष सत्ताकात्मनो ज्ञानद्वारा देहव्यापकत्वस्य प्रतिपादनं कृतम्।

- अष्टाविंशोत्तरद्विशततमे- निष्प्रत्यूहपराभक्त्युपनिषन्नामके

निर्विघ्नभक्तिर्महिमादियुक्ता मूर्त्यन्यवृत्तेर्नहि पूर्णसौख्यम्।
सकाम एवाऽयमकामनोऽन्योऽष्टाविंशकोर्ध्वे द्विशते तदुक्तम्।।

साधुसेवाजन्यनिर्विघ्नसुमहात्म्यज्ञानसहितभक्त्युदयस्य सकामभक्ताऽपेक्षनिष्कामभक्तलभ्याधिकमुक्तिसुखस्य च निरूपणं कृतम्।

- नवविंशोत्तरद्विशततमे- अनीर्ष्यभक्त्युपनिषन्नामके

अनीर्ष्यभक्तिर्निजमोक्षणार्थं कार्याऽपराधेन विवर्जिता वै।
जीवं मनो दुष्टविकल्पकारि न वै कुसंग: स्पृशति स्वरूपे।।
मनो नियम्यं जीवेनान्यथा स्याद् दोषकृत्तु तत्।
वीचावेतत् स्फुटमेकोनत्रिंशद्युक् शतद्वये।।

स्वकल्याणार्थकृतनिरीर्ष्यकभक्तिजन्य भगवत्प्रसन्नताया. स्वापराद्यस्याऽन्यस्मिन्ननारोपणवत्ताया: जीवाधीनमनोवर्तनवत्ताया· निर्विघ्नभजनकर्तृतायाश्च निरूपणं कृतम्।

- त्रिंशोत्तरद्विशततमे- भक्तात्मबुद्ध्युपनिषन्नामके

साधौ हरेस्तु सततं सुनिजात्मबुद्धि: स्यान्मुक्तिदैव परमाक्षरधाम्नि दिव्ये।
प्रीत्या युतोऽस्ति मम धामगतोऽत्र चोक्तं त्रिंशान्विते द्विशतके वचनेस्फुटं तत्।।

भगवत्तत्साधुस्वात्मबुद्धिपक्षप्रीतिपरस्य, कामादिदोषराहित्यं गतिभयराहित्यं भगवद्धामगतिध्रौव्यम् वर्णितम्।

- एकत्रिंशोत्तरद्विशततमे- सदासुख्युपनिषन्नामके

समीन्द्रियाणां वशवान्सुखी स्यान्निजाऽगुणाऽवीक्षणभक्तिविघ्नम्।
मन: पृथक्त्वादिकमेकयुक्ते शतद्वये त्रिंशयुते तदुक्तम्।।

---

सर्वथासुखसाधनानां भक्तिप्रतीपानां च निरूपणं कृतम्।

- द्वात्रिंशोत्तरद्विशततमे- स्थितिशिक्षोपनिषन्नामके

हृदिस्थे ज्ञातृत्वे परमपदमहाद्वारि निवसन्,
बहि. स्त्रीद्रव्याद्यान् परिहरति विघ्नान्निर्विचल:।
भमैवान्तर्वृत्तौ चतुरचलहेतुत्वमुदितं
तरंगे द्वात्रिंशे द्विशतसुयुक्ते चात्र विशदम्।।

निर्विघ्नभक्त्यर्थककारणरूपज्ञातृवृत्तिस्वरूपधामगोपुरस्थितिमद्भक्तोत्सारितबाह्यविषयाऽप्रवेशादिकलाप्रतिपादनम् कृतम्।

- त्रयस्त्रिंशोत्तरद्विशततमे- वृन्दावनोपनिषन्नामके

उक्तं माध्वमते हि दिव्यभवनं वृन्दावनं शाश्वतम्,
नेवैतद्भवतीह तथ्यमिति यद् भौमं त्वनित्यंयत ।
तत्वं चास्ति विशिष्टमेव सततं सुष्टिस्ततो वै त्रयस्,
त्रिंशाढ्ये द्विशते स्फुटं तु हरिणा नित्यं च तत्वादिकम्।।

भौतिक वृन्दावनकाशीसाकेतविनासस्य दिव्यधामात्मकवृन्दावनकाशीसाकेताऽनाश्यस्य जीवेश्वरमायाब्रह्मपरब्रह्मजामनादित्वस्य च निरूपणं कृतम्।

- चतुस्त्रिंशोत्तरद्विशततमे- सत्प्रीतिशान्त्युपनिषन्नामके

कार्यस्तु मानसयुतेन्द्रियसज्जयश्च, शान्ति: समाधिजनिता च सदात्मबुद्धि ।
भक्तोन्मुखत्वविरहो द्विशते चतुस्त्रिंशाढ्ये मितागुणधृतिश्च सुसाधुसंग.।।

मनइन्द्रियजयोपाय महाशान्त्युपायविघ्नाऽपराभवोपायानिप्रीतिमद्भक्तसंगविधानादे· निरूपणं कृतम्।

- पञ्चत्रिंशोत्तरद्विशततमे- भक्ताद्रोहोपनिषन्नामके

निर्मानिता दास्यमपीह मोक्षहेतुस्तु दोषग्रहिणो न मोक्ष ।
जीवात्मनो न्यक्कृतिरूपनाशो हरौ रतस्यास्ति तु मोक्षणं वै।।
निष्प्रत्यूहं तु कल्याणं हरौ प्रीतस्य शाश्वतम्।
प्रोक्तमेतद् द्विशतके पञ्चविंशान्विते स्फुटम्।।

मानत्यागभगवद्तद्भक्ताऽवगुणग्राह्यसंगकरणतद्द्रोहजपापाऽनाशजीववृन्दलतादिफलस्य निरूपण कृतम्।

- षट्त्रिंशोत्तरद्विशततमे- एकान्तिकताप्रश्नोपनिषन्नामके

कालाद्यानां नैकरूपा व्यवस्था वैषम्ये स्यादात्मनस्तत्र किं स्यात्।
एकान्तिक्ये साधनं स्वेष्टनिष्ठा षट्त्रिंशाढ्ये तच्छताभे समुक्तम्।।

भगवत्प्रीतिदार्ढ्य परमाश्रयवद्भक्तस्यैकान्तिकत्वाऽबाधकताया, प्रतिपादकस्य, श्रीहरिस्थसदाचारस्यैकान्तिकत्वसाधनतायाश्च निरूपणं कृतम्।

- सप्तत्रिंशोत्तरद्विशततमे- साराऽसारवस्तूपनिषन्नामके

नैवास्ति सारतरमत्र हरीतरद्वै, प्रीतिर्न संभवति वासनिकस्य चेशे।
चातीवदुष्टसमयादिजकर्मपाशो यस्यास्ति नैव मयि तस्य भवेद् यत. सा।।

भगवत्प्रीतिसत्कर्मपापलयाऽऽसुरभावपरिवर्तनदैवभावश्रेष्ठभक्तिवृद्धसमागमस्नेहिश्रेष्ठ्यवैराग्यविवेक विश्वासमाहात्म्यज्ञानदयादितत्वानां कार्यकारणभावान्वितसमुच्चयानां विवेचनम् वर्तते।

- अष्टत्रिंशोत्तरद्विशततमे- आपत्स्मृत्युपनिषन्नामके

सदादुष्टदेशादियोगे विधेया स्मृतिर्नाममात्रा मनोऽर्चादिपूजा।
परीक्ष्ये निजांगं तदष्टाधियुक्त्रिंशदूर्ध्वे शतोभे समुक्तं दृढं वै।

स्वांगानुकूलनवधाभक्त्यन्यतमप्रकाराऽलम्बितभजनकीर्तनध्यानादिकर्तुर्विषमदेशकालादावपिसुखाप्तिरिति निरूपितम्।

- नवत्रिंशोत्तरद्विशततमे- पतिप्रीतिभक्त्युपनिषन्नामके

प्रीतिः स्वपत्यौ सुपतिव्रतायाः दासस्य सा स्वामिनि भक्तिरूक्ता।
नान्यस्वरूपे कथितं नवत्रिंशोर्ध्वे शतोभे विशदं व्रतं यत्।।

पतिव्रताभक्तिमतो जनस्यान्यत्र गुणवत्तादर्शनेऽपि गुणजन्यप्रीत्यभावो भगवत्येवपरमप्रीतिरिति वर्णितम्।

- चत्वारिंशोत्तरद्विशततमे- स्नेहबन्धनोपनिषन्नामके

हरीतरस्नेह इहैव जन्मान्तरं न कार्य एषः।

---

हरौ स कर्तव्य इतीह चत्वारिंशाधिके वै द्विशते समुक्तम्।।

भगवदितरस्नेहाकरणभगवन्मात्रस्नेहकरणोपदेशः कृतः।

- एकचत्वारिंशोत्तरद्विशततमे - वासनाजीर्णतोपनिषन्नामके

वासनाजीर्णता कार्या, सा विनाश्याऽथ भावना।
कार्या हरावेकचत्वारिंशाऽधिकद्विशतेरिता।।

गुणोद्रेककृतावस्थाभेदाभिन्नभावादेरनुभवजसंस्कारजन्यस्फुरणादेः सत्समागमजन्यवासनाजीर्णत्वादेर्निर्वासनिकभक्तागत भगवदाज्ञामात्रानुष्ठानवत्वादेर्निरूपणं कृतम्।

- द्विचत्वारिंशोत्तरद्विशततमे- कुटुम्बस्नेहाऽकरणोपनिषन्नामके

कुटुम्बिषु स्नेहपरा हि सन्तः पशुप्रखाः कामपरा हि भक्तैः।
न सेवनीयास्त इति द्विचत्वारिंशान्विते वै द्विशते समुक्तम्।।

कामनात्यागसम्बन्धिसेवकादि स्नेहत्यागोपदेशः कृतः।

- त्रिचत्वारिंशोत्तरद्विशततमे- स्वभावस्वरूपोपनिषन्नामके

आत्मनिष्ठायुतभक्त्या वासनाक्षय ईरितः।
कर्मावस्था स्वभावस्त्रिचत्वारिंशे शतद्वये।।

स्वभावप्रकृतिवासनाकर्मस्वरूपतद्वासनानाशक सात्मनिष्ठभक्तिबलं प्रतिपादितम्।

- चतुश्चत्वारिंशोत्तरद्विशततमे- मायातरणोपनिषन्नामके

भक्त्या मोक्षो धर्मनो देवलोको द्वेधा धर्मः श्रीहरेर्योगतः स्यात्।
भक्त्याख्यः सोऽस्यैव रक्षार्थमीशस्याऽऽविर्भावो धर्मभक्त्यन्वितस्य।।
साधोः सेवा सर्वसिद्धिप्रदात्री सत्स्वावासः स्यान्निवृत्तिस्वरूपः।
दोषस्त्याज्यो नम्रता भक्तियुक्ते प्रीतिर्मेऽस्त्यैकान्तिके भक्तवर्ये।।
मित्रे प्रोक्तं स्याद्धितार्थं न तु स्यात् शैथिल्ये धर्मस्य वात्सल्यमिष्टम्।
प्रोक्तं त्वेतत्सुस्फुटं वै चतुश्चत्वारिंशोर्ध्वे द्वेशते वै तरंगे।।

सर्वधर्माणां भागवतधर्मान्वितभक्तिपरकत्वभगवदीयजनादिरुचिभक्तसम्मर्द निवासमतिभक्तजनावगुणाग्रहण-भक्ताग्रविनय निजात्मसत्तारूपव्यवस्थान-भक्तजनगतमहामुक्तभावना- धर्मादिचतुष्यवन्निष्ठसुखवत्व- तदन्यामुखवत्वदेहसम्बन्धि

स्नेहाकरणत्व भक्तजनसम्बन्धित्व भक्तमण्डल निवासित्व मित्रलक्षणहितकारित्वादेः विवेचनं कृतम्।

- पञ्चचत्वारिंशोत्तरद्विशततमे- प्रेमांगभक्त्युपनिषन्नामके

प्रेमलक्षण सुभक्तिरूपणं प्रीतिनाशनमिहात्म निष्ठया।
दास्यसव्यभजनं समं भवेत् मूर्तताऽक्षरपदेनिजेहिता।।

सत्तामात्रजीवचैतन्ये यथावकाशं प्रेमसेवनविधानं कृतं वर्तते।

- षट्चत्वारिंशोत्तरद्विशततमे- मानसीपूजोपनिषन्नामके

कर्तव्यं मम पूजनं तु ऋतुजं भिन्नं मनोज्ं मुदा,
ह्येतत्स्यात्तु मम प्रसादजनकं क्षम्यं ह्युपालम्भनम्।
सद्भिस्त्वाचरितं मयापि चरितं स्थेयं प्रसन्नात्मना,
सम्प्रोक्तं द्विशते तु षड्युजितचत्वारिंशके वाङ्विधौ।।

यथर्तुमानसीपूजावैविध्यस्य, भक्तकृतशिक्षागुणग्राहित्वस्य च वर्णनम् कृतम्।

- सप्तचत्वारिंशोत्तरद्विशततमे- षोडशसाधनकलोपनिषन्नामके

साधनैस्तु खलु षोड्शभिस्तु धाम्नि सेवनमुपैपि हरेर्वै।
भक्तरौच्यमथ सप्तसुचत्वारिंशयुग्द्विशतके कथितं वै।।

सेवाप्राप्तिप्रदानि श्रद्धादिषोडशसाधनानि समुपार्जनीयानीति प्रतिपादितम्।

- अष्टचत्वारिंशोत्तरद्विशततमे- रूच्यरूच्युपनिषन्नामके

हरेः प्रसादस्तु जलार्पणाद्यैः सुसत्यभक्तोऽशिथिलो विपत्तौ।
त्याज्यं त्वरौच्यं तु हरेः सुतुष्ट्यै कार्यं तु रौच्यं न रूचिस्तु माने।।
क्रोधे प्रतिस्पर्धिजने त्वरौच्यमनर्थकृद् ह्रत्कपतं तु ह्येयम्।
शतद्वये चापि तदष्टचत्वारिंशाधिके प्रोक्तमिति स्फुटं वै।।

श्रद्धाभक्तिजन्यभगवत्प्रसन्नतादुःखावस्थधर्मवत्सत्यभक्ततागुणजन्यप्रसन्नतादोषजन्याऽप्रसन्नता रूच्यरूचिमत्तामानक्रोधपराभवाद्यनर्थकरता मिथ. स्पर्धित्वसाम्यदोषाऽनिष्टजनकतादेः विवेचनं कृतम्।

- नवचत्वारिंशोत्तरद्विशततमे- सेव्यसत्पुरूषोनिषन्नामके

---

एकान्तिकस्य पुरूसेवनतो हरेः स्यात् सेवाफलं वृषयुतो नहि बध्यते वै।

भ्रष्टो भवेन्नहि निजात्मसुनिष्ठितो यत्स्पष्टं तु रूच्यरूचिभावनिजांगमुक्तम्।।

नवचत्वारिंशयुते द्वे शते वचसि स्फुटम्।
हरिणा धर्ममान्द्यादेर्भयं सेवा स्ववर्गजा।।

सत्पुरूषसेवनधर्मदाढर्यब्रह्मात्मस्थितिमाहात्म्यज्ञानतदाधाराशैथिल्यरक्षणभगवदरूचिकरकृतिभयरूचिकरकृतिकल्याण
फलाहंकारदम्भादिमज्जनाऽपात्रत्वशुष्काऽद्वैतोपासनाद्यरूचिप्रभृतिप्रतिपादनं कृतम्।

- पञ्चाशोत्तरद्विशततमे- मूर्तिकृत्स्नसुखोपनिषन्नामके

मूर्तिस्थं बहुलं सुखं विषयजं पञ्चैक संस्थानत,
साधूक्तं निजवर्तनं चरणीयं नैव प्रतीपं तत.।
त्याज्या तुच्छकृतिश्च मान उरूधा चेर्ष्या च रूड्वै तथा,
शास्त्राच्छ्रीहरिनिश्चयः करणयो विश्वास एवार्थत.।।
श्रेयं स्यात्तु कुटुम्बिनां सति जने स्नेहाच्च सद्भावत,
सौख्यं श्रीहरियोगतो न तु वचोमात्रात्, समाधौ तु तत्।
साक्षात्कार इहास्ति सौख्यजनको योगश्च वीचौ तु पञ्,
चांशद्युग्विशतेऽत्र सर्वमुदितं श्रीस्वामिना सत्फलम्।।

भगवन्मूर्तिसुखसाधुसमागमविपरीतदोषत्यागधर्मग्रन्थिब्रह्मर्षित्वमानादित्यागस्नेहिकल्याण
साक्षाद्योगजसुखादिनिरूपणं कृतम्।

- एकपञ्चाशोत्तरद्विशततमे- माहात्म्यसुखप्रसादोपनिषन्नामके

निराकारतायाः सुखे लालसाया भवेत्पातिता भक्तियोगाज्जनस्य,
हरेर्दिव्यता धर्मयुग्ज्ञानिता स्याद्धरेर्मोक्षमार्गे सदा रक्षणांगा।
महत्वं गुणा गौरवं सन्महत्ता सदाशीलता वै प्रसादो हरेश्च,
एकासक्तपञ्चाशवीचौ शतोभप्रयुक्ते त्विदं चेरितं मुक्तिसौख्यम्।।

.निराकारभावश्रीहरिकामदोषकल्पनमानादिदोषरक्षणविषयप्रीतिप्रभृतयोभक्तितः
पातकरा. निर्मानमाहात्म्यज्ञानभगवन्मात्र विषयसुखाद्यानिश्चयभक्तिवर्धनां इति वर्णितम्।

- द्विपञ्चाशोत्तरद्विशततमे- निर्विघ्नत्यागोपनिषन्नामके

स्वधर्मविर्तिप्रगृहस्थगौरवं सतां प्रसेवादि तथाऽतिशोभनम्।

महत्तमे धर्मयशोविधानतस्तदाश्रितानां भवतीति गौरवम्।।
सवासनत्यागिजने न गौरवं सुलज्जया धर्मकृतो सुशोभनम्।
द्विसक्तपञ्चाशतरंगके शतद्वये समुक्तं क्षतबन्धनादिकम्।।

तीव्रवैराग्यसाधुस्नेहसत्संगयोगभगवदन्तर्यामित्वज्ञाननियमधर्मवर्तनवज्जननिष्ठंविघ्नाऽभावनिरूपणं कृतम्।

- त्रिपञ्चाशोत्तरद्विशततमे- पञ्चानुसन्धानोपनिषन्नामके

साकारसन्मूर्तश्रीहरेरूपासना ह्यर्थकर्मादिविधानभावना।
वैराग्यसन्धाननिवृत्तवासना परेक्षणोदासनवृत्तिभक्तय:।।
कार्याद्यथौ मद्रूचिमत्प्रसाध्यं मर्तव्यमत्या वृष उत्समर्ज्य:।
शतद्वये तत् त्रिसमस्तपञ्चाशदूर्ध्वके प्रोक्तमिह प्रवीचौ।।

साकारोपासकप्रसन्नतानिराकाराप्रसन्नतातपोयोगादिभगवत्प्रसादार्थानुष्ठितिसप्तकाऽऽवश्यकानुसन्धानपञ्चकादे: विवेचनम्।

- चतु: पञ्चाशोत्तरद्विशततमे- द्विमूर्त्यभिन्नतोपनिषन्नामके

सर्वावतारहेतौ वै सर्वलीलान्विते हरौ।
एक्योपास्तिश्चतु: पञ्चाशद्युक्ते द्विशते त्विह।।

भूमिस्थनेत्रस्थहृत्स्थात्मस्थाक्षरब्रह्मधामतेज: संस्थश्रीहरिमूर्तैक्यमिति प्रतिपादितम्।

- पञ्चपञ्चाशोत्तरद्विशततमे- निराहारेन्द्रियवशित्वोपनिषन्नामके

आहारक्षयतो भवेन्नियमनं सर्वेन्द्रियाणां द्रुतम्,
माहात्म्यं च हरे: प्रसत्तिमिति ज्ञानं च भक्तिर्वृष:।
पाल्यं मोक्षकरं सतामनुवचस्तत् पञ्चपञ्चाशदूर्ध्वे,
प्रोक्तं द्विशते वचस्यतिशुभं सत्संगसंवर्धनम्।।

आहारस्वाल्प्ये इन्द्रियबलस्वाल्प्यस्य, भगवन्माहात्म्यज्ञानबलजन्येन्द्रियविजयस्यैकान्तिकसाधुसंगकरणस्य च विवेचनम् कृतम्।

- षट्पञ्चाशोत्तरद्विशततमे- वुद्ध्यपरिवर्तनोपनिषन्नामके

अनासक्ता भक्ता नहि बहुतरा धर्ममतय:,
सुवैराग्यस्थानां युवतीमति विमोहो न भवति।
स्वधर्माद्यैरेकान्तिक इति जन: स्नेहसहितो,

---

हरेर्मूर्तौ स्थैर्यं गत इह सुविश्वासिरूचिमान्।।

सोढ्व्यार्थे सहनगुणवर्ज्यो न भवति सदा विश्वासार्हो वृषमतिविरागान् परिहरेत्। विनास्वेष्टं नान्यत् मनसिरूचिकृद् वै द्विशतके तुषट्पञ्चाशद्योजितवचसि चोक्तं स्फुटतरम्।।

भगवन्मूर्तिमात्रमग्नस्यमायापदार्थतुच्छत्वं, मानधनस्त्रीस्वभावानां भक्तिप्रीतिनाशकत्वेन त्यागौचित्यम्, एकान्तिक भक्तानां स्नेहेन भगवन्मूर्तौ स्थिरवृत्तिमत्वं प्रवेशनं प्रीतिव्यसनिन: साधुसंगतिमत्वादे: विवेचनं कृतम्।

- सप्तपञ्चाशोत्तरद्विशततमे- दृढभावनोपनिषन्नामके

शीलाद्यैनियमैर्निवर्तत उरूस्त्रीवासना ज्ञानिन:,
क्रोधानुर्द्भवन्ता सुसत्पुरूषगा प्रीतिर्हरौ निश्चय.।
विश्वासश्च विरागिता महिनधीश्चाज्ञास्थिति: सप्तपञ्,
चाशद्युक्त शतद्वये वचसि वै प्रोक्तं हरिस्वामिना।।

वासनानाशकारणभावनोद्भवकारणप्रीतिवैराग्यस्व स्वनियमवर्तनस्य कोमॅपरिणामक्रोधाऽनुद्भवकारणस्य वनवासमाहात्म्य ज्ञानस्वार्थादिकस्यनिरूपण कृतम्।

- अष्टापञ्चाशोत्तरद्विशततमे- अचलाश्रयोपनिषन्नामके

दृढ़ाश्रयो मोहमयीस्थितिर्निजा स्वप्राकृतं हानमघं सतां दुह.।
सन्तोषणं भक्तिमतां हरे: प्रभुर्हृदि स्थितो लक्षणषट्कयुङ्युने।
तादृशस्य सनो द्रोहाद, द्रोह: स्याच्छ्रीहरेरिति।
तरंगे द्विशतेप्रोक्तमष्टपञ्चाशद्रर्ध्वके।।

मायिकतुच्छत्व दृढ़मतदयाश्रयत्व साधुगुणग्राहित्य स्वप्रकृतित्यागित्व साध्वन्वयिभगवन्महाद्रोहादिमत्व - मदर्थसर्वात्मवेदिसाधुमत्स्वरूपत्वमदन्वितसाधुसेवामहाफलवत्वादे: विवेचनं कृतम्।

- नवपञ्चाशोत्तरद्विशततमे- भगवत्स्वरूपज्ञानोपनिषन्नामके

मोक्षापादककारणं निगदितं सर्वावतारि प्रभो:,
साकारत्वमति: सधर्मविरति: प्रीति सुसंगस्तथा।
विघ्नं शुष्कमतिप्रसंगकरणं नाचर्यमेतत्क्वचित्,
स्वोपास्तिर्द्विशतेऽत्र वै नवधिपञ्चाशद्युते वर्णितम्।।

---

साकारोपासनाभक्तिसाधुसंगजात्यांतिकमोक्षस्य, तत्र शुष्कवेदान्तिकुसंगात्मकविघ्नत्यागस्य सांख्ययोगादिसाधनानामात्मपरमात्माऽदर्शकत्वस्य च प्रतिपादनं कृतम्।

- षष्ट्योत्तरद्विशततमे- श्रीहरिस्वरूपवलोपनिषन्नामके

भगन्स्वरूपमतिमज्जनस्य वै ह्यशुभादिदेशसमपाद्यविघ्नता।
भगवत्सुमूर्तिबलनिष्ठया भवेत्परमा सुमुक्तिरिति चात्रकीर्तितम्।।
धनाढ्यस्य दरिद्रत्वे पूर्वसुखस्मृतिर्यथा।
हरे. सुखस्मृति: षष्टियुग्द्विशत तरंगके।।

भगवन्मातात्म्यज्ञानसहितस्वरूपदृढनिश्चयस्य विषमस्थितावपि आत्मपरमात्मदर्शनकारको भक्तिप्रदश्च ध्यानिजनस्चेति प्रतिपादितम्।

- एकषष्ट्योत्तरद्विशततमे- मायिकमृषात्वोपनिषन्नामके

मायाकारमृषात्वमुक्ततनुसत्यत्वं सुख श्री हरे.,
सेवाग्राहकताक्षराधिवसतेरैक्यं त्विहस्थस्य च।
सेव्य: सोऽत्र तदीयपूर्वविभवा वन्द्याश्च भक्तिर्हरे.,
भक्तौ विघ्नकरा धनादय इह त्याज्या वच: पालनम्।।

साधौ जीवं योजयेद्वै, सतांसेवलमाचरेत्। एकषष्ट्यन्विते वीचौ द्विशते स्पष्टमीरितम्। मायिकनश्वरताया आत्ममुक्तब्रह्मपरमात्मदिव्यसगुणसाकारोपासनाभक्तिसेवाकरणता या धनस्त्रीरसासक्तिदेहाभिमानकुसंगिस्नेहसम्बन्धिप्रीति त्याज्यताया: निरूपणं कृतम्।

- द्वाषष्ट्योत्तरद्विशततमे- परब्रह्मनिदिध्यासोपनिषन्नामके

देहाऽहम्मतिरन्यवस्तुममताधीर्योच्यते मायिकी मायां दूरतरां विधाय च मयि प्रीतिं हरौ वर्धयेत्। प्रार्थ्य: साधुसमागमोहि सततं क्लेशो न सद्भि: क्वचित्, त्वात्मब्रह्मधियाऽगुणग्रहृतिर्माहात्म्यमीशस्य मे।। प्रीतिर्मद्विषया विरागमतिताऽन्यत्रेन्द्रियावर्तनम् मय्यासक्तिरितिस्वदैविजनतास्वेतत्प्रवर्तेत वै। निर्यात्येव बहिर्हि चासुरजनश्रोत्रात्वहं श्रीहरिस्त्वेको वै भगवानिति प्रवचनोद्देष्टु: प्रसंग: शुभ.।। निर्बन्धो भवतीह भक्त उरूधा शत्रौ त्वरागाद्यथा तद्वज्ज्ञानमिदं विशल्यकरणं सत्संगिसत्यार्थवत्। नानेके परमेश्वरा: परतमश्चास्म्येव सर्वोपरीत्येवं मां शरणं प्रयाह्युभशते द्वाषष्टिगे चेरितम्।

---

साधुसंग: कर्तव्यो, माया त्यक्तव्या, एक परमेश्वरोऽयं श्रीहरिर्धार्मिरेव भजनीय. प्राप्तव्यश्चेति सर्वसारतमम्।

।।इति दुर्गपत्तनीयान्त्यप्रकरणस्थतरंगा:।।

।।इति तृतीयोऽध्याय:।।